धर्मराजकथा

(०४२)

फो- १००

श्रीअद्भुतधर्मराजकलदायकथा॥

धर्म्मराज
१

ॐ नमः श्रीधर्म्मराजाय॥ ॥नत्वा गुरुं त्रिरत्नञ्च कथयामि समासतः॥ सर्व्वसत्वानुकम्पार्थ वर्ण [illegible] जगद्धसक-
थाम्॥ अथ धीमान्महामत्यो जिनश्रीराज आत्मवित्॥ जयश्रीयं यतिन्नत्वा साञ्जलिरेवमब्रवीत्॥ भदन्त श्रो-
तुमिच्छामि संघरत्नस्य सन्मतेः॥ श्रीमतो लोकनाथस्य माहात्म्यं गुणसुन्नमम्॥ तच्छ्रीमद्बोधिसत्वस्य त्रैलोक्या-
धिपतेः प्रभोः॥ गुणमाहात्म्यमाख्यातु महर्हसि त्वं जगद्धिते॥ इति सम्प्रार्थ्यमानासौ जयश्रीमतिमान्यतिः॥ १
जिनश्रीराजमालोक्य तं यतिमेवमब्रवीत्॥ साधु शृणु महाभाग यथा मे गुरुणोदितं॥ तथाहन्ते समासेन प्र-
वक्ष्यामि जगद्धिते॥ तद्यथासौ महाराजो ह्यशोको नराधिपः॥ विहारे कुक्कुटारामे धर्म्मश्रोतुं समंघेन॥ तन्न-
स समुपाविश्य समन्त्रि जनयोषिकाः॥ उपगुप्तं समर्हन्तं [illegible] णत्वा समुपाश्रयत्॥ तत्र सभामागत्य समर्हन्तं

यतिं मुदा ॥ अभ्यर्च्य साञ्जलिर्नत्वा प्रार्थयदेवमादरात् ॥ भदन्त श्रोतुमिच्छामि लोकेशस्य जगत्प्रभोः ॥ सद्धर्म्म
गुणमाहात्म्यं तत्समादेष्टुमर्हति ॥ एवं तेन महीन्द्रेन प्रार्थ्यमानस्स सन्मतिः ॥ उपगुप्तो महीपालं तमालोक्ये
वमादिशत् ॥ साधु शृणु महाराज यथा श्रुतं मया गुरोः ॥ तथाहन्ते प्रवक्ष्यामि माहात्म्यं त्रिजगत्प्रभोः ॥ तद्य
थासौ महाबुद्धः शाक्यमुनिर्जगद्गुरुः ॥ धर्म्मराजो महाभिज्ञः सर्वज्ञोऽर्हन्मुनीश्वरः ॥ भगवान् श्रीघनः शास्ता
तथागतो विनायकः ॥ माराजित्सुगतो नाथ स्त्रैधातुकोधिपो जिनः ॥ श्रीमन्तोऽनाथनाथस्य गृहस्थस्य महात्म
नः ॥ विहारे जेतकोद्याने विजहार ससांघिकः ॥ तदा तत्र महासत्वो बोधिसत्वो जिनात्मजः ॥ मैत्रेयप्रमुखास्स
र्वे सद्धर्म्मश्रोतुमागताः ॥ तत्रैतं श्रीघनं दृष्ट्वा सुप्रसन्नाशया मुदा ॥ तत्पादाब्जे प्रणत्वा तत्सभायां समुपाश्रये

धर्म्मराज
२

त्॥ सर्वे प्रत्येकबुद्धाश्च अर्हन्तः समुपागताः॥ भगवन्तं तमानम्य तत्रैकान्ते समाश्रयेत्॥ श्रावका भिक्षवश्चा-
पि यतयो ब्रह्मचारिणः॥ शास्तारं तं प्रणत्वा तत्सभायां समुपाश्रयन्॥ अथ योपि महासत्वाः सर्वे सद्धर्म्मवां-
छिनः॥ द्रुतं श्रीघनं दृष्ट्वा प्रणम्य समुपागताः॥ ब्रह्मादयो महाभिज्ञा भासयन्तः समन्ततः॥ द्रुतं सुगतं दृ-
ष्ट्वा प्रणमन्तः समागताः॥ इन्द्रादयः सुराः सर्वे सद्धर्म्मामृतलालसाः॥ पश्यन्तो द्रुतजो नत्वा शास्तारं तं समाग-
ताः॥ तथाग्निप्रमुखाः सर्वे लोकपालाः प्रमोदिताः॥ भगवन्तं तमालोक्य द्रुतं नत्वा समागताः॥ तथा सर्वे च गं-
धर्वा धृतराष्ट्रादयोपि ते॥ सुद्रुतं संनिरीक्षन्ता नमन्तः सहसागताः॥ विरूढकादयः सर्वे कुम्भाण्डाश्च प्रमोदि-
ताः॥ तेपि सुद्रुततो दृष्ट्वा नमन्तः सहसागताः॥ विरूपाक्षादयश्चापि सर्वे नागाधिपास्तथा॥ तेपि दृष्ट्वा सुद्रुतं

गुरुः
२

जिनं नत्वा समागताः ॥ वैश्रवणादयश्चापि यक्षाः सर्वे प्रमोदिताः ॥ पश्पतोद्भुरन्तो नत्वा तं मुनिं समुपागताम्
एवं सूर्यादयः सर्वे ग्रहाधिपाः समागताः ॥ सर्वास्तारागणाश्चापि सर्वविद्याधरा अपि ॥ सिद्धाः साध्याश्च रु-
द्राश्च वायवश्च महेश्वराः ॥ कामधात्वीश्वराः सर्वे श्रीपति प्रमुखा अपि ॥ गारुडेन्द्राश्च सर्वेपि किन्नरेन्द्रा-
द्रुमादयः ॥ वेमचित्रादयः सर्वे दैत्येन्द्रा राक्षसा अपि ॥ महोरगाश्च नागाश्च सर्वेपि जलवासिनः ॥ सर्वेपि दे-
वपुत्राश्च सर्वेपि चाप्सरागणाः ॥ सर्वा गंधर्वकन्याश्च सर्वाः किन्नरकन्यकाः ॥ नागकन्याश्च दिव्यांगा रक्षा-
कंन्याश्च भद्रिकाः ॥ यक्षकन्या असंख्येया तथा च दैत्यकन्यकाः ॥ असंख्ययास्तथा विद्याधरकन्या मनोह-
राः ॥ सिद्धकन्यास्तथा साध्यकन्याश्चापि मनोहराः ॥ देवकन्यादयश्चान्य कंन्याः सर्वा प्रमोदिताः ॥ द्रुराणं त्रि

धर्म्मराज
३

गन्तार्थंप्रणत्वासमुपागताः॥समीक्ष्यसंप्रभासन्तमुपतस्थुःसभान्तिके॥तथाचब्रह्मचारिण्योभिक्षुण्यश्चैल
काअपि॥व्रतिनउपाशकाश्चापितथाचोपासिकाअपि॥ऋषिकन्यास्तथाचान्याःसद्धर्मश्रोतुमागताः॥ति
र्थाश्चब्राह्मणाविज्ञास्तीर्थिकाश्चतपस्विनः॥राजानःक्षत्रियाश्चापिसर्वेराजकुमारकाः॥अमात्यामंत्रिणश्चा
पिश्रेष्ठिनश्चमहाजनाः॥सैन्यायोधगणाश्चापिभृत्यापरिजनाअपि॥गृहस्थाधनिनःसार्थवाहादयोवणि
गणाः॥शिल्पिनःकृषिणश्चापिसर्वेकुतुंविनोपिच॥सर्वेवैश्याश्चशूद्राश्चतथान्येसर्वजातिकाः॥नागराः
जाःपौरिकाश्चापिजानपदाश्चनैगमाः॥ग्राम्याःप्रत्यन्तदेशस्थाकार्पटिकाश्चपार्वताः॥एवंसर्वेपिलोकाश्च
सद्धर्मभक्तिमानसाः॥त्रिरत्नगुणमाहात्म्यंपियूषंपातुमागताः॥तत्रसर्वेपितेलोकाब्रह्मादयउपागताः॥

गुरु
३

तंमुनींद्रंसमालोक्यप्रणामंतःपुरोगताः॥ यथाविधिसमाभ्यर्च्यप्रणम्यचयथाक्रमं॥ त्रिःप्रदक्षिणीकृत्यकृतांजलिपुटा

मुदा॥ तत्सद्धर्मामृतंपातुंपरिवृत्यसमंततः॥ पुरस्कृत्यसमाधायपश्यंतःसमुपाश्रयन्॥ ॥इतिश्रीविक्रमानंदः

विरचितायांधर्म्मराजकथायांदुःस्वप्नशासनानुशंसाप्रथमोध्यायः॥ १ ॥अथानंदोमहाभिज्ञोभगवन्तमवोच

त्॥ भगवन्श्रोतुमिच्छामिशुभाशुभफलंनृणाम्॥ ॥एवमुक्तेथभगवानुवाचभिक्षुमननमम्‌ षड्गति

षुमग्नानांनच्छृणुष्वशुभाशुभम्॥ श्रुतंपूर्वंमयानन्दसदसत्वेतिजीविनाम्॥ चतुर्योनिषुसंजाताःपृथक्कर्म्म

गतासदा॥ ॥अण्डजाःस्वेदजाऔपपादुकाश्चजरायुजाः॥ खगाद्याअण्डजाःप्रोक्तामानवाद्याजरायुजाः॥

स्वेदजाःकृमिकीटाद्यादेवाद्याऔपपादुकाः॥ दृश्यंतेकर्मणाश्चैतत्‌ व्रतशीलेनधीमताः॥ तेषांदोषविशेषेण ॥

धर्मराज
४

जायंतेप्राणिनस्तथा॥चतुर्द्वीपेमहोत्साहे पूर्वजन्मविपाकजाः॥ ॥षड्गतौसंभवाभूता अधमो-
त्तममध्यमाः॥स्वस्वकर्मविपाकेन गतिस्तेषां पृथक्पृथक्॥नयेनजायतेदेवं धर्मेणाजायतेनरः॥ ९
१० ॥क्रोधेनजायतेदैत्यं मूढेनजायतेपशुः॥दानेनजायतेराजा पापेनजायतेकृमिः॥ ॥तस्मात्का-
रणाद्देवं धर्मदानंप्रशस्यते॥शुभाशुभमिदंकर्म कायवाक्चित्तजंततः॥फलंभुंक्तेजनंतस्य लोकोत्तरे-
चलौकिके॥ ॥अथाहपुनरानन्दो-

गुरुः
४

2 1/2

भगवंतं जगद्गुरुम् ॥ पापानां मूललोकानां व्यक्तेयं सम्प्रदर्शयः ॥ कायवाङ्मनसा कर्मः कानि कानि कृता
नि च ॥ यत्सर्वं तद्विशेषं च वदस्मैवादिराड्विभो ॥ ॥ भगवानाह ॥ शुभाशुभफलं नृणां यच्छृणुष्व
स्फुटं ततः ॥ धर्मेण प्राप्यते मोक्ष ममोक्ष मशुभोद्भवम् ॥ ॥ पुनश्चाविस्तरेण ॥ कायदुश्चरितं कर्म त्रिधा
भिन्नं प्रकाशितम् ॥ अदत्त प्राणातिपातः काम मिथ्या तथैव च ॥ वाक्दुश्चरितं कर्म चतुर्विधं प्रकाशित
म् ॥ मृषापिशुनपारुष्यं सभिन्नेन्याहधी मनाः ॥ मनोदुश्चरितं कर्म त्रिधा भिन्नं विदुर्बुधैः ॥ अभिध्याश्चैव वः
व्यापाद मिथ्यादृष्टिस्त्रयो विधाः ॥ यो दयां संत्यजेद्द्रोहि परप्राणवधादिना ॥ तादृशं हिंसकर्मादि प्राणिपा
तस्तदुच्यते ॥ अनेन परहिंसेन आयुश्छिन्नं भवेत्सदा ॥ तस्माच्च कारणान्नरः परहिंसं त्यजेत्सदा ॥ ॥ पर

विषयेचलोभेन अन्यायेनवलेनच ॥ चौर्यामत्य अधर्मेण अदत्त ग्रहणं विदुः ॥ अनेनच अदत्तेन दारिद्रंस
र्वदाभवेत् ॥ तस्माच्चकारणानंद दे अत्तंनैवकारयेत् ॥ ॥व्रतिनीधर्मचारिणा शुचिवेश्यापर
स्त्रियः ॥ सम्वन्धिनी प्रसंगादि काममिथ्यातदुच्यतेः ॥ अनेनकाममिथ्येन अपत्यंनैवसर्वदा ॥ तस्माच्च
कारणान्नन्द काममिथ्यात्यजेत्सदा ॥ ॥ विषयेषुचलोभेषु स्नेहेषुचभयेषुच ॥ असत्येन प्रबोधा
य मृषावादस्तदुच्यते ॥ अनेनमृषावादेन निन्दितंसर्वदाभवेत् ॥ तस्माच्चकारणान्नन्द मृषावादंपरित्यजे
त् ॥ ॥ स्वदोषंगुप्तयेन्योन परदोषंप्रकाश्यते ॥ शापयेन्मर्माहिश्चेतः पारुष्यवचनंविदुः ॥ अनेनचपारु
ष्येन माननाशंभवेत्सदा ॥ तस्माच्चकारणान्नन्द पारुष्यवचनंत्यजेत् ॥ ॥ दुर्हृतिव्यवहारेणवंध्रमि

चस्विरुध्यते॥स्वेनगुणाश्चतथायपैशुन्यंविदधामतः॥अनेनचपैशुन्येननिंदनीयंसदाभवेत्॥तस्माच्चका
रणानन्दपैशुन्यंसर्वदात्यजेत्॥ ॥यस्याग्रेभिन्नवादेनपरचित्तमपर्ययन्॥परस्परविद्वेषस्यात्स
भिन्नविदधामतः॥अनेनचसंभिन्नेनकार्तिनाकर्तयेत्सदा॥तस्माच्चकारणानंदसंभिन्नंसम्परित्यजेत्॥
॥ ॥परद्रव्यादिसम्पत्तिलोभचित्तेनतर्कयेन्॥नदविद्यामितिज्ञेयंदुर्जनैःपरिसेव्यते॥अनेनचः
अविद्येनउन्मत्तंसर्वदाभवेत् तस्माच्चकारणानंदअविद्यासम्परित्यजेत्॥ ॥परदेहादिसम्पत्तौक
चित्तेनसज्ञापयेत्॥अमंगलभवत्विति व्यापादोयंसउच्यते॥अनेनचव्यापादेनजडतासर्वदाभवेत्॥तस्मा
च्चकारणानंदव्यापादंसम्परित्यजेत्॥ ॥परत्रेपापप्रलापेनसुखदुःखंनविद्यते॥दुर्वोधशास्त्रंश्रुत्वा

धर्म्मराज
६

च मिथ्यादृष्टिसनास्तिके ॥ अनेन मिथ्यादृष्टीना चक्षुहीनं भवेत्सदा ॥ तस्माच्च कारणानंद मिथ्यादृष्टिंत्य
जेत्सदा ॥ ॥ एवं दशाकुशलेन पापेनैव सचारिणः ॥ परत्रेयमदूतेन नीयते परिनश्यति ॥ तः
स्माच्चोत्तमयानंद देहवृक्षफलोदयम् ॥ येन येन कृतं कर्म तेन तेन प्रभुंजते ॥ जन्मनाशजरावीचोनि
मग्नाः प्राणिनो हृदे ॥ तस्माज्जीयामहाभीमे भुजंगे भीतिमानिव ॥ देवासुरमनुष्याश्च तिर्यक्प्रेतश्च ना
रकाः ॥ षड्गतौ च सजायन्ते शुभाशुभेन कर्मणा ॥ ॥ इति निष्कृत्वा अथानंद लोकार्थ मनुशोच
यन् ॥ भीतसंसारदुर्वारं संहर्षित तत्तनूरुहः ॥ ॥ अथ भगवानाह ॥ दानेन हरते पापं दानेन धनवर्द्ध
ते ॥ दानेन ज्ञानसाध्यंते दानेन काम सिध्यते ॥ कामसिद्धेन मोक्षं च प्राप्यते नात्र संशयः ॥ अनेन दानमा

गरुः
६

गैंणामुच्यतेयमशासनम् ॥ योमातृपितृन्नपकार पापं हंतुंस्वमूर्त्तिंगुरवेप्रदद्यात् ॥ अनेनस्वात्मदाने
नमातृद्रोहंसदाहरेत् ॥ तस्माच्चकारणान्नंदमातृद्रोहंत्यजेत्सदा ॥ ॥ योभिक्षुद्रव्यंमूषितंप्रभु
क्तं पापंप्रहर्तुंसदान्नंदद्यात् ॥ अनेनअन्नदानेन भिक्षोन्नंमूषितंहरेत् ॥ तस्माच्चकारणान्नंदभिक्षोः
न्नंमूषितंत्यजेत् ॥ ॥ यःसेतुनद्यांप्रतिछिन्नपापं हंतुंप्रकल्पेत्पुलिनंप्रशोभम् ॥ अनेनसेतुक
ल्पेनसेतुछिन्नंहरेत्सदा ॥ तस्माच्चकारणान्नन्द सेतुछिन्नंत्यजेत्सदा ॥ ॥ यःपापहन्तुंगुरवेचकृ
त्सांस्वदेहदानंप्रददेत्प्रसन्नम् ॥ अनेनदेहदानेन गुरवेकृत्सांहरेत्सदा ॥ तस्माच्चकारणान्नन्द गुरवेकृ
त्सांत्यजेत्सदा ॥ ॥ यास्वामिद्रोहंप्रहर्तुंचपापं सदैवस्वामिंचभक्तिंप्रकुर्यात् ॥ अनेनस्वामिभक्ते

नस्वामिद्रोहं हरेत्सदा ॥ तस्माच्चकारणानंद स्वामिद्रोहं त्यजेत्सदा ॥ ॥ योरणपदाहं प्रहर्जेच पापं अमर
स्य चाग्रे होमस्य प्रकुर्यात् ॥ अनेन होमकारेण वनदाहं हरेत्सदा ॥ तस्माच्चकारणानन्द वनदाहं त्यजेत्सदा ॥
विश्वासघातं प्रकृतं च पापं हंतुं प्रकुर्यात्त्रिदशस्य सेवाम् ॥ अनेन सुरसेवेन विश्वासघातकं हरेत् ॥ तस्माच्च
कारणानन्द विश्वासघातं न कारयेत् ॥ ॥ स्वस्वामिवर्ज्यां परपुंसरक्तां हन्तुं च पापं प्रददे स्वदे
हम् ॥ अनेन स्वात्मदानेन परपुंसगमनं हरेत् ॥ तस्माच्चकारणानंद परपुंसगमनं त्यजेत् ॥ ॥ इत्या
दिष्टं मुनीन्द्रेण श्रुत्वानन्द प्रबोधितः ॥ शिक्षबोधितदाससर्वे संज्ञापितास्तनूरुहाः ॥ ॥ इति श्रीवि
क्रमानन्दविरचितायां धर्म्मराजकथायां दानधर्मानुसंशाद्वितीयोध्यायः ॥ २ ॥ ॐ नमः श्रीधर्मराजाय

अथश्रीभगवान्शास्ता शाक्यसिंहो मुनीश्वरः॥ पर्षत्कृत्स्नांसमालोक्य हसन्तुस्मीमभूत्तदा॥ ॥अथानं
दोमहाभिज्ञो लोकार्थमनुशोचयन्॥ आसनात्सहसोत्थाय भगवन्तमुवाच सः॥ भगवन्यातुमिच्छामित्व
न्मुखाम्भोजनिर्गतम्॥ वाक्पीयूषतृषार्त्तोपि गिरिजंकमिवार्द्दितः॥ कश्चित्महाधनो लोके विद्वान्भोगी
चभाग्यवान्॥ दरिद्रो व्याधितो दुःखी शिल्पवन्तोपि चारिणः॥ सुरलोकेगतः कश्चित् निरयेचातिदारु
णे॥ केन कर्मविपाकेन तादृक्स्यां भगवन्कथं॥ तत्सर्वं ब्रूहि वादिन्द्र सर्वलोकहिताय च॥ मयि चानुग्रहं
कृत्वा भवाम्भोनिधिमग्नके॥ ॥एवमुक्तेथ भगवानुवाच भिक्षुसत्तमम्॥ सर्वलोकहितार्थाय स्वम्प्र
भावम्प्रदर्शयेत्॥ तस्मिन्काले पुरुहूत स्त्रयस्त्रिंशान्समागमन्॥ भगवन्तं समालोक्य साञ्जलिरेवमब्रवी

कस्क्याज्युकयास्मानाग्गुपापं

त् ॥ भगवन्विमलमणिप्रभोनाम सप्ताह मरणोभवत् कुतोगतः कुतोजन्म नज्ञातोहं महाविभो ॥ ॥ ए
वमुक्ते पुरुहूतं मुनिन्द्रेणासमब्रवीत् ॥ देवेन्द्र विमलमणिप्रभोनामदेवपुत्रोनिरयेगतः ॥ इत्यादिष्टं मु
नीन्द्रेण श्रुत्वा देवेन्द्रेणोदितः ॥ भगवन्केनपापेन देवपुत्रनिरयेगतः ॥ ॥ अथभगवानाह ॥ द
शाकुशलपापेन अवीच्यां नरके गतः ॥ षोडशवर्षसहस्राणि निमग्नो वीचिनारके ॥ इत्यादिष्टं मुनी
न्द्रेण श्रुत्वा देवेन्द्र अवोचत् ॥ १ ॥ भगवन्केनदानेन अवीच्याः मुच्यते ध्रुवम् ॥ तद्दानं कुहि वादिन्द्र लो
कानां मोक्षहेतवे ॥ ॥ अथभगवानाह ॥ अवीच्या वेदनाशांतं चन्द्रविम्बन्ददे बुधैः ॥ अनेनदानधर्मे
ण अवीच्याः मुच्यते ध्रुवम् ॥ तस्माच्चकारणाच्छुक चन्द्रविम्बम्प्रशस्यते ॥ २ ॥ अथभगवानाह ॥ ततोः

सिछुसंगापिंगु छुयागुपापं

न्येरौरवेपाये नीयतेयमकिङ्करैः॥ पञ्चदशसहस्राणि कल्पाणि रौरवेस्थितः॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवे
न्द्रेणोदितः॥ अहोदुःखसमुद्भूत देवपुत्रः कथंस्थितः॥ ॥इत्युक्त्वासमुरेन्द्रेण भगवन्तमवोचत॥ भग
वन्केनदानेन रौरवमुच्यते ध्रुवम्॥ तद्दानमृहिवादिन्द्र लोकानांमोक्षहेतवे॥ ॥अथभगवानाह
॥रौरवंवेदनाशान्तं सूर्यविम्बंददेद्बुधैः॥ अनेनदानधर्मेण रौरवंमुच्यते ध्रुवम्॥ तस्माच्चकारणाच्छक्रसू
र्यविम्बंप्रशस्यते॥ ३ ॥अथभगवानाह॥ ततोन्ये नीयतेतीर्यक् प्रेतेषुनारकेसुरः॥ चतुर्दशसहस्राणि कल्
पाणि नारकेस्थितः॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्र रोदितः॥ अहोदुःखसमुद्भूतः देवपुत्रः कथंस्थितः
॥इत्युक्त्वासमुरेन्द्रेण भगवंतमवोचत॥ भगवन्केनदानेन तीर्यक्प्रेतंप्रमुच्यते॥ ॥तद्दानंकृहिवादि

कर्म्यामिसाविगरयानापापं

धर्म्मराज न्द्र लोकानां मोक्षहेतवे ॥ ॥अथ भगवानाह ॥ तीर्यक्प्रेतार्दितं शांतं जलदानं ददे हुधैः ॥ अनेन दानधर्म्मे-
९ ण तीर्यक्प्रेतम्प्रमुच्यते ॥ तस्माच्च कारणाच्छुक्र जलदानम्प्रशस्यते ॥ ४ ॥अथ भगवानाह ॥ ततः प्रत्यं-
तके ग्लेक्षे स देवपुत्र जायते ॥ त्रयोदश सहस्राणि दुःखानि स्थित नारके ॥ इत्यादि श्रुं मुनीन्द्रेण श्रुत्वा देवे-
न्द्रेणोदितः ॥ अहो दुःखसमुद्भूत देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा समुन्द्रेण भगवन्तमवोचत ॥ ॰ ॥
भगवन्केन दानेन म्लेच्छगतिम्प्रमुच्यते ॥ तद्दानं क्रु हि वादिन्द्र लोकानां मोक्षहेतवे ॥ ॥अथ भगा-
वानाह ॥ म्लेच्छगतिं प्रमुच्येत पिण्डपात्रं ददे हुधैः ॥ अनेन दानधर्म्मेण म्लेच्छगतिम्प्रमुच्यते ॥ तस्माच्च का- गुरु
रणाच्छुक्र पिण्डपात्रम्प्रशस्यते ॥ ५ ॥अथ भगवानाह ॥ ततोति सारकेरके स देवपुत्र भुञ्जते ॥ द्वादश ९

कर्णमांत विष्नगुपायं

वर्षसहस्राणि मलमूत्राणि वेष्ठितः ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्रणोदितः ॥ अहो दुःखसमुद्भूत देव
पुत्रः कथं स्थितः ॥ इत्युक्त्वा ससुरेन्द्रेण भगवन्तमवोचत ॥ भगवन्केन दानेन अतिसारात्प्रमुच्यते ॥ तद्दा
नं ब्रूहि वादिन्द्र लोकानां मोक्षहेतवे ॥ ॥ अथ भगवानाह ॥ अतिसारात्प्रमुच्येत दानं सन्मार्ज्जनं
ददेत् ॥ अनेन दानधर्मेण अतिसारात्प्रमुच्यते ॥ तस्माच्च कारणात्कु क दानं सन्मार्ज्जनम्बिदुः ॥ ६ ॥
अथ भगवानाह ॥ ततो पाये कुष्ठरोगो सोत्पन्ने जननिन्दिके ॥ एकादशसहस्राणि पूयशोणितप्रसृतः
इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्रणोदितः ॥ अहो दुःखसमुद्भूत देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा ससुरेन्द्रे
ण भगवन्तमवोचत ॥ भगवन्केन दानेन कुष्ठरोगात्प्रमुच्यते ॥ तद्दानं ब्रूहि वादिन्द्र लोकानां मोक्षहेतवे

चिभास्यकागुपायं

धर्म्मराज
१०

॥ ॥अथभगवानाह॥कुष्टरोगंप्रमुञ्चेत आत्मदानंददेद्बुधैः॥अनेनदानधर्मेण कुष्टरोगंप्रमुच्य
ते॥तस्माच्चकारणाच्छक्र आत्मदानम्प्रशस्यते॥ ७ ॥अथभगवानाह॥ततोहीनकुलेपाये देवपु
त्रःसजायते॥दशवर्षसहस्राणि दुःखानिपरिवर्त्तते॥इत्यादिष्टंमुनीन्द्रेण श्रुत्वादेवेन्द्रणोदितः
॥अहोदुःखसमुद्भूत देवपुत्रः कथंस्थितः॥ ॥इत्युक्त्वासुरेन्द्रेण भगवन्तमवोचत॥भग
वन्केनदानेन हीनकुलात्प्रमुच्यते॥तद्दानंब्रुहिवादिन्द्र लोकानांमोक्षहेतवे॥ ॥अथभग
वानाह॥हीनकुलात्प्रमुञ्चेत गृहदानंददेद्बुधैः॥अनेनदानधर्मेण हीनकुलात्प्रमुच्यते॥तस्माच्च
कारणाच्छक्र गृहदानंप्रशस्यते॥ ८ ॥अथभगवानाह॥ततोन्येदुःखानिदुःखे नारकेजायतेपुनः॥

गुरुः
१०

कर्व्यानमाभिंस्वपागुपापं

नववर्षसहस्राणि दुःखानि परिवर्त्तते ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्र रोदितः ॥ अहो दुःखसमुद्भूत
देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा सुरेन्द्रेण भगवन्तमवोचत् ॥ भगवन्केन दानेन दुःखान्ति दुःखमुच्यते ॥
तद्दानं कथं हि वादिन्द्र लोकानां मोक्षहेतवे ॥ ॥ अथ भगवानाह ॥ दुःखान्ति दुःखमुंचेत पिण्डदानं द
देहुधैः ॥ अनेन दान धर्म्मेण दुःखान्ति दुःखमुच्यते ॥ तस्माच्च कारणा च्छक पिण्डदानं प्रशस्यते ॥ तिस्र
पुष्टं ददे त्यि पिण्डं पुत्र पौत्रेणानिश्चितम ॥ मातृ पितृ परं लोके नैव कश्चित्सुरेश्वर ॥ ९ ॥ अथ भगवानाह
॥ ततश्चाधोमुखे पाये सद्धर्मनिन्दिके तथा ॥ अष्टवर्षसहस्राणि अधोमुखे प्रतिष्ठितः ॥ इत्यादिष्टं मुनी
न्द्रेण श्रुत्वा देवेन्द्र रोदितः ॥ अहो दुःखसमुद्भूत देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा सुरेन्द्रेण भगवन्तमवो

धर्म्मराज
११

चत्॥ भगवन्केन दानेन अधोमुखं प्रमुच्यते॥ तद्दानं ब्रूहि वादिन्द्र लोकानां मोक्षहेतवे॥ ॥अथ भग
वानाह॥ अधोमुखात्प्रमुच्येत वृद्धसेवां प्रकुर्वते॥ अनेन धर्मकर्मणा अधोमुखात्प्रमुच्यते॥ तस्माच्च कार
णाद्धेतोः धर्मकर्म प्रशस्यते॥ १० ॥पुनर्भगवानाह॥ दशानाम्यातके नरके देवपुत्रः समाश्रितः॥ स
प्तवर्षसहस्राणि कृच्छ्राद्दुःखभोगिनः॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्रोऽदितः॥ अहो दुःखसमु
द्भूतो देवपुत्रः कथं स्थितः॥ इत्युक्त्वा समुरेन्द्रेण भगवन्तमवोचत्॥ भगवन्केन दानेन दशपातस्प्रमुच्य
ते॥ तद्दानं ब्रूहि वादिन्द्र लोकानां मोक्षहेतवे॥ ॥अथ भगवानाह॥ दशपातस्प्रमुच्येत दशदानस्प्र
कल्पयेत्॥ अनेन दानधर्मेण दशपातं प्रमुच्यते॥ तस्माच्च कारणाद्धेतोः दशदानं प्रशस्यते॥ ११ ॥अ

१ गोभूतिलहिरण्याज्यवासोधान्यगुडानि च॥ रूप्यलवणमित्याहुः दशदानैः प्रकीर्तिताः॥

गुरूः
१२

थभगवानाह ॥ कृमिकीटोत्पन्ननरके देवपुत्रः सजायते ॥ षष्ठीवर्षसहस्राणि कृच्छ्रेण दुःखभोगिनः ॥
इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्र रोदितः ॥ अहो दुःखसमुद्भूतो देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा ससुरे-
न्द्रेण भगवन्तमवोचत ॥ भगवन् केन दानेन कृमिकीटात्प्रमुच्यते ॥ तद्दानं ब्रूहि वादिन्द्र लोकानां
मोक्षहेतवे ॥ ॥ अथ भगवानाह ॥ कृमिकीटात्प्रमुच्येत गंधद्रव्यं ददेद्बुधैः ॥ अनेन दानधर्म्मे-
ण कृमिकीटात्प्रमुच्यते ॥ तस्माच्च कारणाच्छुक्ल गन्धद्रव्यं प्रशस्यते ॥ ॥ कारण्डव्यूहे उक्तं वै क-
थयामि सुरेश्वर ॥ ततः सम्प्रस्थितश्चासौ लोकेश्वरो विलोकयन् ॥ वाराणस्यां समुद्भूतं सत्वोत्समभिग-
च्छति ॥ दृष्ट्वा स प्राणिनोनेकान् असंख्येयान् सुदुःखितान् ॥ स विड्मूत्रमृदालग्नास्तिष्ठन्त्येवं विचिन्तयन्

न

॥ हा पापं कथमेतानि सविघ्नुत्वाश्रिताहं ॥ कृम्यसंख्यसहस्राणि प्रोद्धरेयं प्रवोधयन् ॥ तत्र स चिन्तयन्नस
त्वा कृपया सम्विलोकयन् ॥ भ्रमररूपमाधाय भ्रमते तदुपाचरन् ॥ नमो बुद्धाय धर्म्माय संघायेति प्रणा
मितं ॥ मधुरस्वरमुच्चार्य भ्रमते स विचरन् ॥ तं खे भ्रमन्तमालोक्य सर्वे ते प्राणका अपि ॥ तत्कलारव
माकर्ण्य चिन्तयन्त्येवमुत्सुकाः ॥ अहोयं सुखवान् पक्षी भ्रमते खे यथेच्छया ॥ किमनेन कृतं पुण्यं येनैव चर
ते सुखं ॥ किमस्माभिः कृतं पापं येनामध्याश्रिता वयं ॥ इति विचिंतयन्ते सर्वे कृमयस्तत्सुखेच्छिताः ॥ तद्ध्वि
रीवमनुश्रुत्वा संतिष्ठन्ते तदुन्मुखाः ॥ यथा ते कृमयः सर्वे तन्नामस्मृतिभाविताः ॥ तत्रिरत्ननमस्का
र ध्यात्वा तिष्ठंति चेतसा ॥ तथा चैवं समुच्चार्य त्रिरत्ननाम चेतसा ॥ स्मृत्वा कृत्वा नमस्कारं तिष्ठंति विम

लेमुदा ॥ एनत्पुण्यविलिप्तास्ते सर्वे संजातपक्षकाः ॥ ततउड्डीयर्गंगाया निपतंतस्त्यजंत्यसून् ॥ ततस्ते॰
विमलात्मानः सम्प्रयाताः सुखावतीम् ॥ सर्वे सुगंधमुखानाम बोधिसत्वा भवंत्यपि ॥ १३ ॥ अथभ
गवानाह ॥ ततोन्धकारे नरके नीयते यमकिंकरैः ॥ पञ्चवर्षसहस्राणि देवपुत्रः समाश्रितः ॥ इत्यादि
ष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्रो रोदितः ॥ अहोदुःखमसम्भूत देवपुत्रः कथं स्थितः ॥ इत्युक्त्वा मसुरेन्द्रेण भ
गवंतमवोचत् ॥ भगवन् केन दानेन अंधकारात्प्रमुच्यते ॥ तद्दानं ब्रूहि वादिन्द्र लोकानां मोक्षहेतवे
॥ ॥ अथभगवानाह ॥ अन्धकारात्प्रमुंचेत दीपमालासुराग्रतः ॥ अनेन दीपदानेन अंधकारात्प्र॰
मुच्यते ॥ तस्मात्त्वकारणाच्छक्र दीपदानं प्रशस्यते ॥ १४ ॥ अथभगवानाह ॥ ततोन्येसुरधाराख्ये नीय

देवतादेवताणिगु दीपमालाधुयागुयापं

लसंपकागुणाप

धर्म्मरा १३ तेयमकिंकरैः ॥ चतुर्वर्षसहस्राणि क्षुरधारे पदक्रमत् ॥ हा देवेति हदित्वाच देवपुत्र कथं स्थितः ॥ इत्युः
क्त्वा समसुरेन्द्रेण भगवंतमवोचत् ॥ भगवन् केन दानेन क्षुरधारान्प्रमुच्यते ॥ तद्दानं कुहि बादिन्द्र लोः
कानो लोकानां मोक्षहेतवे ॥ ॥ अथ भगवानाह ॥ क्षुरधारान्प्रमुच्येत ग्रामे मार्गप्रकल्पयेत् ॥ अ
नेन मार्गकल्पेन क्षुरधारात प्रमुच्यते तस्मात्त्वकारुणाच्छक्र मार्गकल्पं प्रशस्यते ॥ १४ ॥ अथ भग
वानाह ॥ ततो ऽसिपत्रे गहने नीयते यमकिंकरैः ॥ तृसृवर्षसहस्राणि देवपुत्र वने स्थितः ॥ इत्यादि श्रुत्स्व
निःश्रुत्वा देवेन्द्र शोदितः ॥ असिपत्रविदार्येण देवपुत्रः कथं स्थितः ॥ ॥ इत्युक्त्वा समसुरेन्द्रेण भ गरु: १३
गवंतमवोचत् ॥ भगवन् केन दानेन असिपत्रान्प्रमुच्यते ॥ तद्दानं कुहि वादिन्द्र लोकानां मोक्षहेतवे ॥

वनेमितयागुणाप

जद्राहिनास्यंकागुणापं॥

अथभगवानाह॥ ॥असिपत्रात्प्रमुच्येत छत्रदराडादिकंददेत्॥अनेनदानधर्म्मेण अमिपत्रात्प्र
मुच्यते॥तस्माच्चकारणाच्छक्र छत्रदराडंप्रशस्यते॥ १४ ॥अथभगवानाह॥ततोग्निघटेनरके नीयते
यमकिंकरैः॥द्विसहस्रवर्षाणि देवपुत्रःसतिष्ठति इत्यादिष्टंमुनीन्द्रेण श्रुत्वादेवेन्द्ररोदितः॥अहोदु
ःखसमुद्भूत देवपुत्रकथंस्थितः॥इत्युक्त्वासमुरेन्द्रेण भगवंतमवोचत्॥भगवन्केनदानेन अग्निघटा
त्प्रमुच्यते॥तद्दानंकुहिवादिन्द्र लोकानांमोक्षहेतवे॥ ॥अथभगवानाह॥अग्निघटात्प्रमुंचेत देवाः
ग्रेहोमकारयेत्॥अनेनहोमकारेण अग्निघटात्प्रमुच्यते॥तस्माच्चकारणाच्छक्र होमकर्मप्रशस्यते॥
१५ ॥अथभगवानाह॥ततोन्पेप्रेतनघांनीयतेयमकिंकरैः॥एकवर्षसहस्राणि देवपुत्रःसतिष्ठति॥इः

भगाहि तिष्ठयां गुपापं

धर्म्मराज त्यादिष्टं मुनिन्द्रेन श्रुत्वा देवेन्द्रशोदितः॥ अहो दुःखसमुद्भूत देवपुत्र कथं स्थितः॥ इत्युक्त्वा समुरेन्द्रेण भ
१४ गवन्तमवोचत॥ भगवन्केन दानेन प्रेतनद्यास्तरिष्यति॥ नेह्वानं कुहि वादिन्द्र लोकानां मोक्षहेतवे॥
अथ भगवानाह॥ प्रेतनद्याः प्रमुंचेत गोदानं सम्प्रकल्पयेत्॥ अनेन दानधर्म्मेण प्रेतनद्यास्तरेत् क्रुवम
तस्माच्च कारणाच्छक्र गोदानं सम्प्रशस्यते॥ १८ ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा शक्र प्रवोधितः॥ पुन
:शाक्यमुनीन्द्रेण पुरुहूतं समब्रवीत्॥ इदं षोडशदानं यः करोति स्वर्गगामिनी॥ न करोति सहस्राक्ष सप्र गुरुः
धा कोल जायते॥ सोपि जन्मावतारेपि मलं च्चैव प्रभक्षयेत्॥ तस्माच्च कारणाच्छक्र दानधर्म्मं प्रशस्यते॥ १४
इत्यादिष्टं मुनीन्द्रेण श्रुत्वा देवेन्द्र शोचितः॥ ॥ अथ शक्र समुत्थाय श्री घनं तं मुनीश्वरं॥ कृतांज

लिपुटोनत्वा·प्रार्थयेद्देवमादरात्॥भगवन्केनदानेभ्यो.नरकेभ्यःसमुत्थितः॥कथंपापविनिर्मुक्तःसद्गतिं
समवाप्नुयात्॥ ॥तदुपायंजगन्नाथ·कृपयासेसमादिशः॥येनासौपातकान्मुक्तःसद्गतिंसमवा॰
प्स्यति॥त्राहितंभगवन्शास्तः·पश्यंतंकृपयादृशा॥नरकेभ्यःसमुद्धृत्य·सज्जनोसर्वथेरये॥ ॥इति
सम्प्रार्थितेनेन·शक्रेनसमुनिश्वरः॥तंसुरेन्द्रंसभांश्चापि·समालोक्यैवमादिशत्·॥शृणुशक्रप्रवक्ष्यामि
सर्वबुद्धैःप्रभाषिताम्॥धारणींपरमाम्विद्यां·सर्वदुर्गतिशोधनम्॥ ॥मण्डलंचापिसंलिख्य·दर्श
यित्वासुशोभितम्॥इत्युक्त्वाधारणीविद्यां·मण्डलंचापिदर्शयेत्॥तदासर्वेभिक्षुगणाःसुरेन्द्रोपिप्रमोदिता
ः॥स्वासनात्सहसोत्थाय·प्रणमंतंमुनीश्वरम्॥ततोदिव्यापहारैश्च·दिव्यालंकारभूषणैः॥सर्वोपकरणैश्चापि

श्रीघनं तं समर्च्चयेत् ॥ ततः प्रदक्षिणीकृत्य नत्वाष्टांगैः प्रमोदितः ॥ ॥ तदा सर्वे भिक्षवोपि धारणीः
त्तां प्रभाषिताम् ॥ एतत्पुण्यानुभावेन नाकान्निःसृतोभवत् ॥ ततो विमलप्रभो नाम देवपुत्र दिवं यः
यौ ॥ भूत्वा सुगंधमुखो नाम देवपुत्रः प्रचेरिरे ॥ इत्यादिष्टं मुनीन्द्रेन श्रुत्वा शक्र दिवं ययौ ॥ ॥ भि
क्षवोपि तदा सर्वे संहर्षिता स्मनुरूहाः ॥ ॥ इति श्रीविक्रमानन्दविरचितायां धर्मराजकथायां
षोडशनरकोद्धारदानधर्मानुसंशानुनीयोध्यायः ॥ ३ ॥ शुभम् ॥ ॐ नमो रत्नत्रयाय ॥ ॥ अ
थावोचत् जगच्छास्ता सर्वविल्लोकजिज्जिनः ॥ आनन्दं तं समालोक्य पुनरेवं समादिशत् ॥ यत्र वना
न्तरं तत्र वारिणायपरिवर्त्तिता ॥ अनेकजलजंतुभिर्वासितं क्रीडितं सदा ॥ ॥ तत्र दीर्घानुकामा

नं प्राणीनं भोक्तुमिच्छन्ति ॥ तदा सर्वे महात्वस्मा लंघितुं न कदाचन: ॥ पापिन: प्राणिनो भोक्तुं सदा
त्रैव प्रतिष्ठित: ॥ ॥ केचिन्मांसं प्रभुञ्जित: केचिन्नेत्रं प्रभुंजित: ॥ केचिच्छ्रोत्रं प्रभुंजित: ॥
केचित् प्राणं प्रभुंजित: ॥ केचिन्मज्जां प्रभुंजित: केचिद्रक्तं प्रभुञ्जित: ॥ केचित्पादं प्रभुञ्जित: ।
केचित्हस्तं प्रभुञ्जित: ॥ ॥ तस्मात्तीया महानद्या लंघितुं न प्रशक्नुयात् ॥ इत्यादिष्टं मुनी
न्द्रेण श्रुत्वा नंद: समब्रवीत् ॥ भगवन् तरितोपायं तन्नद्या: सहसा वद ॥ इति विज्ञापितं श्रुत्वा मुं
नीन्द्रेण समब्रवीत् ॥ तन्नद्या: सरितोपायं वक्ष्येहं लोकहेतवे ॥ तद्यथा यन्त्रगच्छेत्वं त्रिरत्नं भद्रका
रकम् ॥ ॥ तं स्मृत्वा सरणं गत्वा भजेच्च सर्वदादरात् ॥ ये तेषां सरणं गत्वा न तेखाद्यन्ति जन्तु

ना॥ तन्नद्यास्सरित्कामा जलदानंददेत्सुदा॥ एतत्पुण्यानुभावेन तन्नद्याः पारगं भवेत्॥ ॥ श्रो॰
त्रोपि न प्रभुञ्जितः घ्राणश्चापि न खादति॥ पादश्चापि न भुंजित हस्तश्चापि न खादति॥ मज्जाश्चापि न
भुञ्जित रक्तश्चापि न पिवति॥ मांसश्चापि न भुंजित नेत्रश्चापि न खादति॥ ॥ जंतोरपि परित्र
स्ता पलायन्ति इतस्ततः॥ तस्मादनेमानवेन जलदानं महोत्तमम्॥ अनेन जलदानेन नद्यास्तरति॰
विस्तरम्॥ तदा सर्वे जनास्तत्र नद्याः सन्तरितोगमन्॥ ॥ इत्यादि हं मुनीन्द्रेण श्रुत्वानन्दः सम
ब्रवीत्॥ भगवन् कस्मै प्रदातव्या माज्ञापयितुमर्हति॥ इति विज्ञापितं श्रुत्वा आनंदाय समब्रवीत्॥ ॰
श्रूयतां जलदानस्य विधिश्चापि समासतः॥ स्वर्णभाण्डे हृप्यभाण्डे ताम्रभाण्डे तथैव च॥ पूर्वज

त्सकृतं कर्म पापं सर्वं हरोदिति ॥ ॥ इत्युक्त्वा भिक्षवे गुरवे ब्राह्मणाय समर्प्पयेत् ॥ येन चान्ने जल
दानं न प्रकुर्वन्ति मानवाः ॥ ते सर्वे सुचिसुखा नाम प्रेतयोनि भवंति हि ॥ तस्मात्त्व कारणानन्द जलदानं
प्रशस्यते ॥ कारण्डव्यूहे उक्तं वै प्रेतयोनिश्चएकथाम् ॥ ॥ असौ श्रीमान्महासत्वो लोकेश्वरस्तत
श्वरन् ॥ प्रेतलोकान्समालोक्य प्रेतालये भिगच्छति ॥ तत्र प्रेतालये गत्वा प्रेतान्पश्यन् सदूरतः ॥ शीतर
श्मिसमुत्सृज्य प्रविवेश प्रभासयन् ॥ तद्रश्मिसम्प्रभासन्ति समवभास्य सर्वतः ॥ तत्प्रेत भुवनं सर्वं क
रोति शीततान्वितं ॥ ॥ तदा ते प्रेतिकाः सर्वे शीतरश्मिसमन्विता ॥ किमेतदिति संचिन्त्य तिष्ठंति
विस्मयान्विताः ॥ यदा तत्र प्रविष्टोसौ लोकेश्वर प्रभासयन् ॥ तदा वज्राशनिर्भूमि उपशांता समंततः ॥ त

दद्भुतं समालोक्य द्वारपालः सविस्मितः ॥ ॥ किमेतदिति संचिन्त्य लोहिताक्षो विलोकयन् ॥ उत्थाय
सहसादाय कालकूटमहाविषम् ॥ भिण्डिपालं धनुर्वाणं धृत्वा संभ्रमते रुषा ॥ तत्रतं रत्नपद्मस्थं शीतर
श्मिप्रभास्वरम् ॥ ॥ विलोक्यासौ महारौद्रचित्तोपि विस्मयान्वितः ॥ तद्रश्मिसम्पर्शस्पृष्टः का
रुण्यपवित्रमाप्तवान् ॥ स्वपापसाधनं कर्म संभाव्यैवं विचिन्तते ॥ धिग्मां यदीदृशे पापं साधने दुष्टकर्म
णि ॥ संरक्तो द्वारपालोत्र भूत्वा करोमि पापकान् ॥ नैवमेदृशं कर्म पालयतः शुभं भवेत् ॥ ॥ नूनं
मेतन्महत्पापफलं भुज्यं भवेत् सदा ॥ किमीदृक्कर्मसाधव्यं केवलदुःखसाधनं ॥ तदहं नात्र तिष्ठेयं त्य
क्त्वा गेहं व्रजाम्यपि ॥ इति विचिन्त्य स द्वारपालो तिकरुणान्वितः ॥ ॥ पुरतस्तं महासत्त्वं प्रणत्वा च

एतेनततः॥तत्रतंसमुपायातंशुद्धांशुसंप्रभासितम्॥समीक्ष्यप्रेतिकाःसर्वेधावंतिपुरतोद्रुतम्॥तस्य
तेपुरआगत्यक्षुत्पिपासाग्नितापिताः॥ ॥पानीयमभियाचन्तस्तिष्ठंतिपरिवृत्यवै॥तान्दृ
ष्ट्वासमहासत्वःश्चीमुखानगोदरान्॥दग्धस्थूणाश्रयानास्थियंत्रवदतिमूर्छितान्॥ ॥स्व
केशरोमसंछन्नकृशांगान्विकृताननाम्॥क्षुत्पिपासाग्निसंदग्धान्विण्मूत्रश्लेष्मभोजिनः॥ई
दृशान्पापिनोदुष्टान्प्रेतान्सर्वान्विलोकयन्॥तेभ्योतिकरुणार्तात्मा दद्यात्पज्ञोद्भवंजलम्॥तः
दत्तुतेनिपीयापिपातुमिछन्ततत्पुरः॥तानतृप्तान्सआलोक्यलोकेशोतिदयाकुलः॥दशभ्यः
स्वांगुलीभ्योपिनिश्चारयतिनिम्नगाः॥तच्छुवन्तिःसमालोक्यसर्वेतेप्रेतिकामुदा॥यथेछासम्पि

वन्तोपि नैवतृप्तिसमागताः॥ भूयोपि पातुमिच्छन्तः सर्वेते समुपाश्रिताः॥ ॥तमेवसमुपालो
क्य विभ्रमंते तृषातुराः॥ भ्रमन्तस्तान्विलोक्यासौ लोकेशोतिदयान्वितः॥ दशपादांगुलीभ्योपि निश्चार
यतिचापगाः॥ ॥नाश्चमहानदीर्दृष्ट्वा प्रेतासर्वेपितेमुदा॥ समुपेत्य पिबंतोपि नैवतृप्तिंस
मागताः॥ तानतृप्तान्विलोक्यासौ लोकेशोतिकृपान्वितः॥ सर्वेभ्योरोमकूपेभ्यो निश्चारयतिचाप
गाः॥ ॥नाश्चापितेसमालोक्य सर्वेप्रेतास्तृषार्दिताः॥ सहसासमुपाश्रित्य प्रपिबन्तेयथेप्सितं
॥यदातेप्रेतिकाः सर्वे तदुदकंसुधानिभम्॥ अष्टांगगुणसम्पन्नं पिबन्त्यास्वाद्यमोदिताः॥ तदासर्वेऽ
पितेपूर्णगात्राविपुलकण्ठकाः॥ परिपुष्टेन्द्रियास्तृप्ता भवंतिसम्प्रमोदिताः॥ ॥ततश्चासौ

महासत्वो दृष्ट्वासाञ्जलतोषितान् ॥ भूयोपि करुणात्मन्त्रैः स्तोषयितुं समीहते ॥ तत्र स करुणासिन्धुर्मेघा-
ग्रानुत्थाय सर्वतः ॥ प्रणीतसुरसाहारसम्प्रवर्षयते निशाम् ॥ ॥ तानदिव्यसुरसाहारान् प्रव-
र्षितान् समन्ततः ॥ दृष्ट्वा ते प्रेतिकाः सर्वे सविस्मय प्रमोदिताः ॥ समीक्ष्य स्वेच्छया दाय यथाकामं प्रभुं-
जते ॥ ततः सर्वेपि ते सत्वा सदाहाराहितोषिताः ॥ ततस्ते सर्व आहारैः पानेश्चाप्यमृतोपमैः ॥ सन्तर्पिताः
महानन्दसुखोत्साहसमन्विताः ॥ तदाते सुखिताः सन्तः सद्धर्मगुणभाषिणः ॥ ॥ नमो बुद्धाय ध-
र्माय संघाय च नमो नमः ॥ इति त्रिभ्यो नमस्कारं कृत्वा चरतः सर्वतः ॥ एतत्पुण्यानुभावेन सर्वत्रापि
शुभं भवेत् ॥ इत्येवं स महासत्वो लोकेश्वरो जिनात्मजः ॥ सर्वान्प्रेतान्समुद्धृत्य प्रेषयनिसुखावतीम् ॥ इ

धर्मराज त्यादिष्टं मुनीन्द्रेण श्रुत्वानन्द प्रमोदितः॥ ॥पुनरपि भगवानाह॥ शृणवानन्द प्रवक्ष्यामि प्रेत
१९ योनिं प्रमुञ्चयेत्॥ वापीपनारीं निर्मित्वा जलदानं ददेत्सदा॥ एतत्पुण्यानुभावेन नैवं भवति प्रेतिका
ः॥ तस्माच्च कारणानन्द जलदानं महोत्तमम्॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वानन्दः समब्रवीत्॥ भगवन्
श्रोतुमिच्छामि अन्येयमपुरिं कथाम्॥ इति विज्ञापितं श्रुत्वा शाक्यसिंहोति हर्षितः॥ ॥अथ
शाक्यमुनिर्भगवान् आनन्दं समब्रवीत्॥ तन्नयान्वं तां वह्नि प्राकारं परिवर्जितम्॥ अग्निज्वाला गुरु
समाकुला नैव गन्तुं प्रशक्नुयात्॥ कस्मिन्काले शमीभूतं कस्मिन्काले महोज्वलम्॥ तस्माच्च कारणा १९
नन्द लंघितुं नैव शक्नुयात्॥ पापिनः प्राणिनो दृष्टं हुंकारं शब्दनादितम्॥ ॥धर्म्मिणः प्रा

णिनो दृष्टं सूक्ष्मनादं प्रकीर्त्तितम् ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वानंदः सविस्मितः ॥ ॥ तस्मिन्
काले समायाता सुशीला नाम ब्राह्मणी ॥ भर्त्तुः शोकेन रोदित्वा भगवंतमवोचत् ॥ भगवन् भर्त्तु मेः
मृत्युभूतं कुत्र गमिष्यति ॥ इति विज्ञापितं श्रुत्वा ब्राह्मणी तां समब्रवीत् ॥ ॥ ब्राह्मणि त्वत्भ
र्त्तुना नित्यं महिषं चैव विक्रियम् ॥ एकस्मिन् समये रात्रौ क्षेत्रे व्याघ्रेणैव हतः ॥ यमदूतैर्महाघोरे
अनले पातितः रुषा ॥ षष्ठी वर्षसहस्राणि भुक्ता नारकयातनाम् ॥ ततः कर्मवशात् ब्राह्मि विडाल
त्वं ततो गतः ॥ पुनः कुकुटयोनिर्वै शृगालत्वं ततोभवत् ॥ ॥ पुनर्मानुषयोनिश्च मध्यदेशे स
मुद्भवः ॥ ततो वहुगते काले मरणं तस्य चाभवत् ॥ अस्य शांतिं प्रवक्ष्यामि पूर्वपापविशुद्धये ॥ स

र्यमाराधयेन्नित्यं व्रतं सूर्यस्य वासरे ॥ गायत्रीमूलमंत्रेण दशायुतजपंस्तथा ॥ प्रयागे नियतः स्नानं
माघवैशाषकार्तिके ॥ यज्ञहोमं ततः कुर्याद्विधिपूर्वं विशेषतः ॥ विविधं गंधद्रव्यं च नानारत्नस
मायुतम् ॥ आचार्याय ततो दद्यात् सर्वपापविशुद्धये ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वा ब्राह्मी प्रबोधि
ता ॥ मुनीन्द्रेण यथा उक्तं ब्राह्मणा पाकारितं तथा ॥ यज्ञहोमादिकर्मेण पूजितं तं मुनीश्वरम् ॥ तदा
भगवान् प्रहर्षित्वा आशिर्वादं ददे द्विताम् ॥ त्वया धर्मेण ब्राह्मणि तव भर्तु दिवं प्रयात् ॥ ॥
इत्याशिषं मुनीन्द्रेण ब्राह्मणोपि दिवं ययौ ॥ तदा ब्राह्मणी हर्षित्वा मुनीन्द्रायसमब्रवीत् ॥ पादाः
जे प्रणातिं कृत्वा प्रहर्षित्वा गृहे ययौ ॥ पतिव्रतानुधर्मेण ब्राह्मणपि दिवं ययौ ॥ तस्माच्च कारण

नन्द श्चेस्त्वं पतिव्रतोहूयम् ॥ इत्यादिष्टं मुनीन्द्रेण श्रुत्वानंदादिभिक्षवः ॥ सर्वेच सम्प्रहर्षित्वा स
सुद्धसरणेगताः ॥ ॥ इतिश्रीविक्रमानन्दविरचितायां धर्म्मराजकथायाञ्जलदान अग्नि॰
दानानुशंसाचतुर्थोध्यायः ॥ ४ ॥ शुभम् ॥ ❖ ॥ अथ भगवान्बुद्धः शाक्यसिंहोविनायकः ॥ सर्वज्ञ
ःसुगतः शास्ता धर्म्मराजस्तथागतः ॥ भिक्षुभिः श्रावकैः सार्द्धं चैलकैः शुद्धमानसैः ॥ भिक्षुणीभिः सुशीला॰
भिर्बोधिसत्वोगणैरपि ॥ विहृत्य पर्वते पृष्ठे इन्द्रमालागुहांतके ॥ आदिमध्यांतकल्याणं दिदेश धर्म्ममुत्त
मं ॥ तस्य धर्म्मदेशनां श्रोतुं सर्वेलोका समागताः ॥ देवादैत्याश्च गंधर्वाः सिद्धायक्षाश्च किन्नराः ॥ साध्या विद्या
धराश्चापि राक्षसा गरुडा अपि ॥ एवमन्येपि लोकाश्च सद्धर्म्म वांछिनो जनाः ॥ सह सासमुपागत्य दृष्ट्वा॰

तं श्रीघनं मुदा ॥ नत्वा प्रदक्षिणीकृत्य पुरतः समुपागता ॥ यथाक्रमं समभ्यर्च्य नत्वा कान्ते उपाश्रयन् ॥
॥ तदा वोचत् जगच्छास्ता आनंदं तं विलोकयन् ॥ यमपुर्या राजधान्यां द्वाराणां च विशेषणाम् ॥ निश्चि-
तं ते प्रवक्ष्यामि शृणवानन्द समाहितः ॥ पूर्वे रूप्यमयं द्वारं दक्षिणे अयोमयं तथा ॥ ॥ पश्चिमे-
ताम्रमयं द्वारं उत्तरे स्वर्णमयं तथा ॥ तत्र द्वारे समासितं द्वारपालाति भीषणाम् ॥ असिवाणाधनुःपाशं
गृहित्वा नित्य संस्थिताः ॥ एकैक द्वारे दूतानि पञ्चपञ्चशतानि च ॥ ॥ केचित्काकमुखा दूताः के-
चित् गृध्रमुखास्तथा ॥ केचित् श्वानमुखा दूताः केचित् व्याघ्रमुखास्तथा ॥ केचित्सिंहमुखा दूताः केचि-
त्कोलमुखास्तथा ॥ ॥ पूर्वद्वारे स्थिता दूताः स्थूलांगाः पीतवर्णिकाः ॥ दक्षिणद्वारे स्थिता दूताः

क्रोधांकृष्णवर्णिकाः॥ ॥पश्चिमद्वारेस्थिताइताःकशारक्तवर्णिकाः॥उत्तरद्वारेस्थिताइताःशांतासी
तवर्णिकाः॥एतानिसर्वइतानिनित्यंश्चैवसमाश्रिताः॥भ्रमंतःसर्वतोनित्यंयमराजस्यचाज्ञया॥हस्तिदा
निकामनुजाःनियंतेहस्तिमारुहं॥अश्वदानिकामनुजाःनियन्तेअश्वमारुहम्॥ ॥रथदानिका
मनुजाःनियंतेरथमारुहं॥शैयादानिकामनुजाःनियंतेशैयमारुहं॥धर्म्मिणःपूर्वद्वाराच्च नियन्तेयमः
किंकरैः॥ ॥दानिनश्चोत्तरद्वाराच्चनियंतेयमकिंकरैः॥पापिनःकालपाशेनवज्रौंदराडेनताडितम्
नियतेक्षुरधारेणमार्गेणायमकिंकरैः॥धर्म्मिणःप्राणिनोदृष्ट्वानानावाद्यप्रवादिताः॥सुष्टुःसुगतिमार्गे
णनियतेयमकिंकरैः॥ ॥इत्यादिष्टंमुनीन्द्रेणश्रुत्वानन्दःसमब्रवीत्॥शास्तर्यमाज्ञयाकस्मै निः

यन्तेयमकिंकरैः॥ ॥इतिविज्ञापितंश्रुत्वा आनंदाय समब्रवीत्॥देवासुरमनुष्यादीन्नियंतेः
यमराड्ज्ञया॥ इत्यादिष्टंमुनीन्द्रेण श्रुत्वानंदसविस्मितः॥ तदादूतान्समाहूय पितृपतिः समब्रवी
त्॥ दूताममाज्ञयास्वर्गे शक्रस्यभवनेचरः॥ इतिविज्ञापितंश्रुत्वा दूताःसर्वेदिवंययुः॥ ॥त
दादूतगणाःसर्वे भ्रमंतस्त्रिदशालये॥सुरेन्द्रस्यतदास्वप्ने ददर्शयमकिंकरैः॥सप्तहस्तप्रमाणांगा क्रो
धातिभीषणाननाः॥ ॥उर्द्धकेशास्थूलनेत्रा दण्डपाशकराधराः॥एतादूतगणाःस्वप्ने दर्शित्वा
त्रशितास्थितः॥ विबुद्ध्यतेसुरेन्द्रस्य शोकातिविस्मयान्वितः॥ इन्द्रासनेसमाहूय परिदेवोविषादितः
॥तस्मिन्कालेसुरेन्द्रस्य सिंहासनप्रकंपितः॥सुवर्णरत्ननिर्माल्य किरीठोपिप्रपातितः॥एतच्छ्रुतिनि

मित्रानि दृष्ट्वा स त्रिदशाधिपः ॥ हा स्वर्गात्पतितोस्मीति ध्यात्वैवं च व्यचिन्तयेत् ॥ ॥ हा हा मे जायते
कष्टं पुण्यञ्च क्षीयतेधुना ॥ तदत्र किं करिष्यामि यत्रोपायैर्न शक्यते ॥ यस्माद्देहं दिवश्च्युत्वा परेयनर
केध्रुवंम् ॥ ॥ साम्प्रतं कोत्र रक्षेमां यास्यामि सरणं क्रुहः ॥ सर्वैरपि मुनीन्द्रैश्च मृत्युर्जेतुं न शक्य
ते ॥ तन्मया विस्मयां धेन केनोपायेन शक्यते ॥ हाहा क्रतुशतैर्लब्धं स्वर्गराज्यं मयाचिरात् ॥ स्वप्नानुभूतः
वत्सर्वं यत्सौख्यं भुज्यतेधुना ॥ सर्वमेवं परित्यज्य गंतव्यं नरके मया ॥ ज्ञात्वापि भाव्यते नैव साम्प्रतं किङ्क
रिष्यते ॥ पूर्वार्जितं हि यत्पुण्यं तत्सर्वं क्षीयतेधुना ॥ तत्कोमां नरके रक्षेत् हाहतोस्मि स्वकर्मणा ॥ पुनर
क्षिता लोकाः पुण्येन चिरजीविनः ॥ पुण्येन सुखभोक्तारः सर्वविद्याधिपा अपि ॥ यावत्पुण्यं सुखं भुक्त्वा चां

धर्म्मराज
२३

तिसर्वजंतवः॥ निहीनेपुण्यचिन्तेतु पतितंदुःखसागरे॥ अहमपितथायावत्पुण्यंदीव्यसुखंसदा॥ भुं॰

क्त्वावरोगणैःसार्द्धंरमयित्वारयंजगत्॥ साम्प्रतंपुण्यरत्नेन विहीनातोदिवच्युतः॥ पतित्वानरकेभुंज्या

दुःखानिसर्वदाभ्रमन्॥ तदत्रकिंकरिष्यामि कोमेत्रातातुंप्रशक्नुयात्॥ पुण्यमेवंप्रशक्नोति पुण्यंनविद्यतेध

ना॥ तत्कस्यशरणंयास्येकोमेत्राताभवेदिह॥ सर्वथाहंविनष्टोस्मि नमोस्तुदेवकर्मणे॥ यज्ञावित

ज्ञवेदेवं अभाविनं॰तज्ज्ञवेत्॥ अवश्यंभाविनोभोगप नज्ञोंक्तव्यंसर्वजंतुभिः॥ ॥ इतिध्यात्वाविपन्॰

न्नासःसदेवाधिपतिस्तदा॥ शोकागारेनिरुत्साहस्तस्थौमुहुर्विनिश्वसन्॥ एवंचिन्ताविमोह्रांता शक्र

नस्वामिनंशची॥ दृष्ट्वाच्युतिनिमित्तंतु समालोक्यैतदब्रवीत्॥ स्वामिन्नात्रविषीदत्वंधर्मालंव्य॰परस्पता

स्व१

गुरुः
२३

म्॥ किमेवंतिष्ठसेदेव किंविषादैर्नसेत्स्यते॥ विपदागमआसन्नश्चिन्त्यतामवभञ्जनम्॥ पुरुषाधैर्यमालं
व्यनरंनिपेविदंबुधिः॥ अलंघ्यंनास्तिलोकेषु विपदामितिनिश्चयः॥ तद्विपत्तिंसमुत्तर्तुमुपायंपरिचिं
न्तयः॥ नवापिजगतांयत्तु यदिमाःक्लेशनाशयः॥ तद्देवांलंघनोपायंचिंतयस्वजगत्प्रभो॥ सर्वथाखलुवै
मुखादन्विष्यान्विष्ययतनः॥ महद्भिःस्वर्गमिच्छन्ति गुणालब्धाइवापदः॥ यद्यस्तितेमहावीर विपत्तिःशाः
मनमतिः॥ तदत्रसहसोपायंकर्तुमर्हतिसर्वथा॥ पराक्रमैवशक्यंयत्नत्नोपायेनशक्यते॥ तस्माददत्रप्र
तीकारंकर्त्तव्यंसहसाप्रभो॥ यद्यस्त्यनुप्रतीकारः किमेवंतेविषादिता॥ यदिनास्तिप्रतीकारस्तेनापिकिंवि
षादितः॥ ॥ इतिशच्योदितंश्रुत्वासशक्रःकम्पिताशयाः॥ मृत्युशंकाभिसंतप्तोदृष्ट्वाशचीमुवा

चर्तां॥ प्रियेत्र किंकरिष्यामि यत्नोपायं न शक्यते॥ सर्वथा नो दिवश्श्रुत्वा पतेयेन रके ध्रुवम्॥ अवश्यं भाविनः
नो भावा भवंती भव चारिणाम्॥ सर्वत्र पुरतो मृत्युः सर्वेषामपि जन्मिनाम्॥ मृत्युर्हि बलवान्वीर त्रैधा
तुकं भुवनेष्वपि॥ सर्वलोकैः प्रयत्नैर्वा विजेतुं नैव शक्यते॥ सर्वेपि त्रिदशेन्द्राश्च महावीरा महर्द्धिकाः॥ ते
पि सर्वे प्रयत्नैर्वा मृत्युं जेतुं न शक्नुयात्॥ ब्रह्मेन्द्राश्च महाभिज्ञाः शापानुग्रकारिणः॥ ते पि शापोग्निभिः
सर्व मृत्युं दग्धुमशक्नुयुः॥ वन्हयोपि महोज्वालाः सर्वलोकाभिदाहिनः॥ तेपि सर्वे तथा दग्धुं मृत्युमेकं न
शक्नुयुः॥ राक्षसेन्द्रा महावीराः सर्वदुष्टभयंकराः॥ तेपि सर्वे तथा मृत्युं संजितुं न शक्नुयुः॥ वायवश्च महावे
गा जगत्प्रक्षोभचारिणः॥ तेपि सर्वे तथा मृत्युं क्षोभयितुं न शक्नुयुः॥ यक्षेन्द्राश्च महावीराः सर्वदुष्टनिवा

एयः ॥ तेपिसर्वेनथामृत्युं निषेद्धुं नैव शक्नुयुः ॥ इशानाद्याश्च महाभिज्ञा भूतेशाप्रमथाधिपाः ॥ तेपिसर्वेनथामृ-
त्युं मर्दयितुंनशक्नुयुः ॥ ग्रहाश्चसर्वलोकानां सुखदुःख प्रदायकाः ॥ तेपिहि समये मृत्यो वंचयितुं नशक्नु-
युः ॥ सर्वाश्चामातृकादेव्या यथेप्सितवरप्रदाः ॥ ता अपिसमयेमृत्यु र्वरदानपराङ्मुखाः ॥ गणेशो विघ्नदन्ता-
रःसर्वसिद्धिप्रदायिनः ॥ तेपिचसमयेमृत्योः किञ्चित्कर्तुं नशक्नुयुः ॥ महाकाल महावीरा दुष्टसंहारकार-
काः ॥ तेपिचसमयेमृत्योः किञ्चित्कर्तुं नशक्नुयुः ॥ भैरवाश्चमहावीराः सर्वलोकाश्चसाधकाः ॥ तेपिचसम-
येमृत्योः प्रार्थनार्थपराङ्मुखाः ॥ कुमाराश्चमहावीराः सर्वकर्मानुसाधिनः ॥ तेपिचसमयेमृत्यो भवेयुर्विमु-
खा अपि ॥ विद्याधरा महाविज्ञाः सर्वविद्याकराविदः ॥ तेपिचमृत्युनाघ्राते जडवत् विकराँशयाः ॥ सिद्धाश्चा

पिमहावीराःसिद्धिमंतोमहर्द्धिकाः॥तेपिमृत्युसमाक्रांतोनिर्विघ्नतांपरिमोहिताः॥साध्याश्चापिमहा
वीराःयथेच्छाकर्मसाधिकाः॥तेपिमृत्योर्वशाक्रांतोमूकाइवविमोहिताः॥नागेन्द्राश्चमहाभीमाःदृष्टी
श्वासादिदंशिनः॥तेपिमृत्युपरिपृष्टेनिर्विषाकृमिकीटवत्॥गरुडाश्चमहाभीमामहावेगामहर्द्धिका
॥तेपिमृत्युमुखंदृष्ट्वाक्वचित्गंतुंनशक्नुयुः॥दैत्येन्द्राश्चमहावीर्य्यासर्वशत्रुजिताश्रयः॥तेपिमृत्युं
तथाजेतुंशक्नुवंतिनकेचनः॥गंधर्वाश्चमहावीराःसंगीतिमोहकारकाः॥तेपिमृत्युमुखंदृष्ट्वास्वयमेवा
भिमोहिताः॥किंनरेन्द्राःखगंताचसर्वलोकविमोहिकाः॥तेपिमृत्युमुखंप्राप्यनिश्चलापरिमोहिताः॥
भूताश्चापिमहोद्दामाजगदुन्मादकारकाः॥तेपिमृत्युमुखंप्राप्यनिरुद्धान्नाशमंगताः॥पिशाचाश्चमहो

न्मत्ता जगदोजोपहारिणः ॥ तेपि मृत्युर्वलं दृष्ट्वा निर्मदा विलयं गताः ॥ क्षत्रियाश्च महाशूराः निर्जितसर्व-
शत्रवः ॥ तेपि मृत्युं जगच्छत्रं मयितो पि क्षमंतिनः ॥ ब्राह्मणाः वेदविज्ञाश्च सर्वस्वस्त्ययनंकराः ॥ तेपि मृ-
त्युः परिघ्राते किंचित्कर्तुं क्षमंतिनः ॥ ऋषयोपि महाभिज्ञाः सर्वलोकशुभंकराः ॥ तेपि च समये मृत्योः
किंचिद्वक्तुं क्षमंतिनः ॥ यतयोपि महाभिज्ञा निर्जितविषयेंद्रियः ॥ तेपि च समये मृत्यो निश्चेता विकलें-
द्रियाः ॥ योगिनोपि महासिद्धा योगध्यानसमाहिताः ॥ तेपि च समये मृत्यो मोहिता नैवशक्नुयात् ॥ साध-
का मंत्रिणः सिद्धाः सर्वकर्माभिसाधकाः ॥ तेपि च समये मृत्यो नसिद्धाः शुभसाधनः ॥ डाकिन्योपि महा-
सिद्धाः सर्वकार्यार्थसाधकाः ॥ ताश्चापि समये मृत्योः किंचित्कर्तुं नशक्नुयुः ॥ धन्वंतरिर्महाभिज्ञः सर्वे-

धर्मराज २६

रोगा हि शांतकृत॥ सोपि च समये मृत्योः प्रभो हि मुपप्रस्थितः॥ औषधोपि महावीर्याः पथ्यापहारकाः
सदाः॥ अपि ता मृत्युना घ्राते ह्यपथ्या सविषा ईवा॥ चिन्तामणि महारत्नो वांछितार्थसुसिद्धिदः॥ सोपि
हि मृत्युना पृष्ठे निर्बलो गुण वर्जितः॥ ॥एवमन्ये प्रयोगाश्च रक्षायत्नादिधारणाः॥ तेपि स
र्वे वृथा ह्येव मृत्युनाशं समुपस्थितः॥ सर्वलोकाः सुरा दैत्या यक्षगंधर्वकिन्नराः॥ राक्षसा गरुडा नागाः सि
द्धविद्याधरादयः॥ मन्वादयो नराः सर्वे सिंहादि पशुजातयः॥ पतंगाः कृमिकीटाश्च सर्वमृत्युवशे स्थिता
ः॥ कस्य नास्ति भवेन्मृत्युः त्रिधातुभुवनेष्वपि॥ सर्वेषामपि जंतूनां सर्वत्र मरणं ध्रुवम्॥ न तत्र किं करि
ष्यामि यत्रोपायेन शक्यते॥ न कस्य मरणं यास्ये कोपि त्रातुं न शक्नुयात्॥ एवमेव तदा ज्ञाना नन्सर्वं:

गुरु २६

क्षीयतेमम ॥ तत्कोत्रान्याभवेत्त्राता दृश्यतेनमयाधुना ॥ सर्वथाहं दिवश्च्युत्वा पतितोनरके भ्रमन् ॥ कियत्
कालंवसेयाहमितिचापिनमन्यते ॥ ॥ इत्युक्त्वाससमरत्भर्त्तां मृत्युमेव विचिन्तयेत् ॥ निराशः
याविषण्णास्यस्तस्थौपश्यमुद्रुप्रियां ॥ एवंशोकविदग्धास्यं तं दृष्ट्वाचकिनाशची ॥ साविपच्छमनोपायं
कारयित्वान्यवेदयत् ॥ स्वामिनत्रापिमा एवं विषादं कर्तुमर्हसि ॥ विपत्तिशमनोपायं कथ्यते तच्छृणु प्र
भो ॥ अवतीर्यस्वयंतावज्जम्बूद्वीपंत्वयाधुना ॥ विपत्तिशमनोपायं पृच्छतां श्रमणाः प्रभो ॥ प्रभावविपुलो
त्कर्षाः श्रूयंतः श्रवणाकिलः ॥ युज्यन्तेकुशलैरेव येषांकुशलगामिनः ॥ तथात्वंकुशलंतेषां युज्यमानोभ
वत्कृताम् ॥ एतत्पुण्यानुभावेन तेषांयुतं भवेत्प्रभो ॥ ॥ इतिमत्वास्वयंगत्वाजम्बूद्वीपेत्वयाधुना ॥

धर्मराज
२७

मृश्यतांश्रमणाः कश्चि घ्यसनेचक्षणाक्षमः ॥ ॥इतिप्रियोदितंश्रुत्वा तथेतिसमरुत्पतिः ॥ प्रतिज्ञा
यस्स्वयंस्वर्गाज्जम्बूद्वीपमवातरत् ॥ अवतार्यस्वयंतत्र जम्बूद्वीपेसमंततः ॥ अन्विष्यश्रमणान् दृष्ट्वा समेः
त्यैवातद्भाषत् ॥ ॥भवंतश्रमणाविज्ञा सर्वलोकार्थसाधकाः ॥ तन्ममापि महत्कार्यं साधयितुंस
मर्हथ ॥ यस्स्वर्गाच्च्युतिनैमित्यं जायतेममसांप्रतं ॥ तद्विपच्छमनोपायं प्रदातुंसमुपागतान् ॥ दृष्ट्वासमु
रराजोपि तदन्तिकादयासरन् ॥ तेकुर्युमेकथंरक्षं मामेवप्रणमंतिये ॥ ॥इतिध्यात्वासदेवेन्द्रो
भग्नास्वपदेययौ ॥ तत्रशोकालयेस्थित्वा च्युतिमेवंविचिंतयेः ॥ सस्वर्गविषयंध्यात्वा तस्थौक्लेशाग्नितापि गरुः
तः ॥ एवंलीनंचतंशक्रं दृष्ट्वासाचकिताशची ॥ उपेत्यस्वामिनस्तस्य पुरःस्थित्वाभ्यपृच्छत् ॥ किमेवंतिष्ठसे २७

स्वामिन्माविषीदजगत्प्रभो॥जम्बूद्वीपेभवानेकंश्रमणंकिन्नपश्यति॥ ॥इतिशच्यासमंपृष्टेस
शक्रस्त्रिदशाधिपः॥निश्वसस्त्वंप्रियंभार्यांसमालोक्यैनदब्रवीत्॥किमत्राहंप्रचक्षेतेसर्वथास्मिद्दिव
च्युतः॥एकोपिश्रमणोनैवशक्नुयाद्रक्षितुंमम॥जम्बूद्वीपेस्वयंगत्वाश्रमणानन्विष्यसर्वतः॥दृष्ट्वापि
पद्मोपायंपरिप्रष्टमुपाचरेत्॥तत्रमेश्रमणाःसर्वेदृष्ट्वामांसमुपागत॥सहसासमुपागत्यप्रणान्तुं
समुपागताः॥नेमेकुर्युःकथंरक्षांमामेवप्रणमन्तियः॥तदत्रव्यसनेत्राताममैकापिनविद्यते॥तेनस्व
विषयंस्मृत्वाच्युतिशंकाविपन्नधा॥किंचिद्वैर्यंसमालंब्यशक्रोपिस्थानुसत्रनः॥तदत्रकिंकरिष्यामि
यास्यामिसरणंक्कुह॥सर्वथाहंदिवश्च्युत्वापतेयंनरकेधुना॥इतिभर्त्रोदितंश्रुत्वासाशचीकरुणादिताः

धर्मराज ॥स्वामिनं देवराजं तं बोधयितुं समब्रवीत्॥ ॥स्वामिनत्र विषादत्व माकृथा शोकतां मनः॥ अवश्यं
२८ भाविनो भावा भवंति सर्वदेहिनाम्॥ तथापि धैर्य्यमालम्ब्य परित्यज्य विषादिताम्॥ विपत्तिशमनोपायं क
र्त्तव्यं सहसा प्रभो॥ भवान् किन्न विजानीते यदृशो भगवान् जिनः॥ सर्व्वलोकाधिपः शास्ता सर्वलोकहि
तंकरः॥ सर्व्वमारविजेता च सर्व्वसत्वानुकंपकः॥ जम्बूद्वीपे धुनोत्पन्न सत्वानां हितकारणे॥ तत्र तस्य
मुनीन्द्रस्य श्रीघनस्य जगद्गुरोः॥ उपेत्य सरणं गत्वा प्रार्थयस्व यथेप्सितम्॥ स सम्बुद्धो हि महासत्वो षडभिज्ञो
विनायकः॥ जगच्छास्ता जगन्नाथः सम्बोधिज्ञानदेशकः॥ सर्व्व विजेता च सर्व्वसत्वहितार्थदः॥ महावीर्य्यो गुरू:
जगद्भर्त्ता सत्यवादि जगत्प्रभुः॥ सर्वज्ञः सुगतो वीरो धर्म्मराजस्तथागतः॥ भद्ररूपी विभुःशंभो मुनीन्द्रो भ २८

मार २

गवान्सुधीः ॥ एवम्विज्ञाय देवेन्द्र तम्बुद्धं सरणां व्रज ॥ वुद्धादन्यत्त्रिलोकेपि शुभकारि नकश्चिनः ॥ तस्माद्दे
नंजगन्नाथं समभ्यर्च्य समादरात् ॥ विपतिंशमनोपायं प्रार्थयस्व स्वयंप्रभो ॥ एतद्धि परमोपाय मिह
मुत्र शुभाप्तये ॥ यदि दैवाद्विपत्तिः स्याच्छुभं तु प्राप्स्यते ध्रुवम् ॥ शुभेन जेष्यते पापं निष्पापो हि भवेच्छु
धीः ॥ ततो वोधिमतिं प्राप्य चरेल्लोकाहिते सदा ॥ ततः क्लेशान्विनिर्जित्य परिशुद्धत्रिमण्डलः ॥ क्र
मात्पारमिता पूर्य्य सम्बोधिपदमाप्स्यसि ॥ एतद्देवं महारत्नं सर्वसत्वाहितार्थदं ॥ वोधिसत्वैमहासत्वे
प्राप्तं प्रोक्तम्मतभवम् ॥ एवमत्र भगवान् समारभ्य समाप्तये ॥ सम्बुद्धभजनं कृत्वा चार्तां सर्वदा प्रभो ॥
ये भजंति सदा वुद्धं न ते गच्छन्ति दुर्गतिम् ॥ सर्वदा समस्तुखं भुक्त्वा प्रान्ते यान्ति जिनालयम् ॥ ये शृण्वन्ति स

धमराज
२९

दाधर्म्मं नते गच्छन्ति दुर्गतिम् ॥ विहाय पापकान्कायान् धर्म्मकायानुपाशते ॥ ये भजन्ति सदा संघन्नते
गच्छन्ति दुर्गतिम् ॥ परिशुद्धाशया सोऽत्वं भुक्त्वा यान्ति सुखावतीम् ॥ ॥ इति मत्वा सुरेन्द्र त्वं
त्रिरत्न सर्वदा भज ॥ तथा ते मङ्गलं नित्यं सर्वत्र सर्वदा भवेत् ॥ इति भार्योदितं श्रुत्वा इन्द्रस्तं मुनिश्व
रम् ॥ प्रत्यासन्ने विपत्काले परित्रासससमन्यते ॥ ततः स तां प्रियां दृष्ट्वा तथेत्युक्त्वा समुत्थितः ॥ सहसा
क्षितिमासाद्य जिनाश्रममुपाययौ ॥ ॥ इन्द्रमालागुहागर्भे स्थितन्तं सुगतं मुनिं ॥ तेजोधातुं
समापन्नं द्रष्टुं ययौ समानुगः ॥ गुहान्तिकमथासाद्य ससहायः शचीपतिः ॥ उच्चपञ्चशिखं नाम गंध
र्वसुतमादरात् ॥ तेजोधातुसमापन्नं भगवंतं सुखेधुना ॥ सकलाकौशलेन त्वं प्रबोधयितुमर्हसि ॥ उप

गुरु
२९

सर्पत्यकालेयं प्रविसत्यनिवेदितः॥ सतां मनाशयज्ञः स[illegible]वमानस्वभांजनं॥ ॥इत्युक्तेते
नशक्तेन सोपिगंधर्वदारकः॥ व्यधावैदुर्यदण्डानां विमस्वरसारणां॥ स्वभावमधुरोदारा रम्याभिस्तु
तिगीतिभिः॥ सविवोध्योजिनंचक्रे दर्शनावसनं हरेत्॥ ॥ततः प्रविश्यदेवेन्द्रः सहृदेवैंप्र
मोदितः॥ संददर्शमुनीन्द्रंतं वर्षन्तं प्रशवोमृतम्॥ सप्रणामानतः शास्तु नखदर्प्पणमार्जनं॥ च
कार मौलिमन्दार मकरन्देन पादयोः॥ ततः प्रदक्षिणीकृत्वा ससहायस्ततम्मुनिम्॥ अभ्यर्च्यसाञ्जः
लिर्नत्वा धर्म्मश्रोतुंमुपाश्रयत्॥ ततस्तस्य सुरेन्द्रस्य भगवान्समुनीश्वरः॥ ज्ञात्वाशयविशुद्धत्वं दिदे
शधर्म्ममार्यकम्॥ ततः सद्धर्म्मसमाकर्ण्य सदेवाधिपतिमुदा॥ दृष्टः सत्य प्रसन्नात्मा धर्म्मचक्षुवभृ

धर्म्मराज ३० न्तदा॥ ततः पुण्यविशुद्धात्मा स देवाधिपतिस्तदा॥ भगवन्तं समानम्य साञ्जलिरेतदब्रवीत्॥ ॥भ
गवन्नाथ सर्वज्ञ विजानीयाद्भवानपि॥ यन्मे च्युतिनिमित्तानि जायते मम साम्प्रतम्॥ तदहं स्वर्गतं श्रु
त्वा पतेयं नरकेष्वपि॥ तद्विपत्तिशमनोपायं प्रदातुमेव मर्हति॥ एतदर्थं महाभिज्ञ भवतां शरणं व्रजे
॥ तद्भवान्कृपया दृष्ट्या पश्यन्मां त्रातुमर्हति॥ नान्योस्मि व्यसनं शास्ता विद्यते रक्षको मम॥ ॥भ
वान्नेव जगत्त्रापि तथा मां त्रातुमर्हति॥ अद्याग्रेण सदा शास्ता भवतां शरणागतः॥ त्रिरत्नसेवकश्चा
हं भविष्यामि समाहितः॥ यथा पुरा प्रतिज्ञातं भवता त्र तथा मम॥ विपत्तिशमनोपायं प्रदत्वा परिपू गुरु ३०
र्यता॥ ॥ इति तेन सुरेन्द्रेण प्रार्थितेन मुनीश्वरः॥ कृपादृष्ट्या सुरेन्द्रं तं समालोक्यैवमब्रवीत्॥

हे शक्र समाधाय शृणु वक्ष्यामि ते हितम् ॥ सर्वबुद्धैर्मुनीन्द्रैर्यत्समाख्यातं मया श्रुतम् ॥ यदि लोकहिता
र्थेन चिरंजीवितुमिच्छसि ॥ ॥ अमितायुप्रदां विद्यां गृह्णाण पठ धारय ॥ ततस्ते सर्वपापानि निः
शेषं क्षिणुयुर्द्रुतम् ॥ पुण्यनि वर्द्धयेयुश्च मङ्गलं सर्वदा भवेत् ॥ ततस्सर्वेपि माराश्च यास्यंति विलयं द्रुत
म् ॥ ततः आयुप्रवृद्धिस्यात्तस्य ते सर्वमीहितं ॥ ॥ ततो लोकहितार्थेन वोधिचर्याचरत्कृति ॥
यावद्दीक्षा भवेत्स्थातुं तावद्भुक्त्वा सुखं चर ॥ ततः क्लेशान्विनिर्जित्य परिशुद्धत्रिमण्डलाः ॥ क्रमात्पार
मिताः पूर्य संवोधिसमवाप्नुयाः ॥ एवं विज्ञाय देवेन्द्र त्रिरत्नशरणं गतः ॥ ॥ एनां सिद्धां महावि
द्यां धारणीं गृह्य सम्पठ ॥ इत्युक्त्वा स जगच्छास्ता भगवान्स मुनीश्वरः ॥ अमितायुःप्रदाविद्यास्पठित्वे

ड्रायसंददौ ॥ तांगृहित्वासदेवेन्द्रः प्रणत्वासाञ्जलिर्मुदा ॥ भगवंतंतमभ्यर्च्य पुनरेवंसमब्रवीत् ॥ ॥
भगवन्नाथसर्वज्ञ त्रिरत्नंशरणंगतः ॥ सर्वदेमांमहाविद्या मयारक्ष्यसदाहृधे ॥ इत्युक्त्वामहत्भर्त्ता
तांविद्यांश्रद्धयांग्रहीत् ॥ यथादिष्टंमुनीन्द्रेण तथापठेत्समाहिताः ॥ ततस्तत्पठितोत्यन्नैःपुण्यैस्तस्य
महत्पते ॥ सर्वच्युतिनिमित्तन्न त्प्रशांतिसमुपाययौ ॥ ततस्तच्छांतमालोक्य मशक्रसम्प्रमोदितः ॥
पुनस्तंश्रीघनंनत्वासाञ्जलीरेमेवेब्रवीत् ॥ ॥ भगवन्नाथलोकेश भगवत्कृपाप्रसादतः ॥ य
च्युतिनिमित्तमेतत्सर्वंगोप्यतेधुना ॥ तच्चिरंजीवितोस्मीति मन्यतसुगताधिपः ॥ तत्क्लेशाब्धेःसमु
त्तीर्यलभामिस्वसनंपुनः ॥ तदत्रश्रद्धयानित्यंयावज्जीवंशुभेचान ॥ त्रिरत्नभजनंकृत्वाचरेयंसम्प्र

मोदितः ॥ ॥ इत्युक्त्वा स महेन्द्रस्तं भगवंतं कृतांजलिः ॥ प्रणत्वा स सहायश्च त्रिदिवे स्वालयं यः
यौ ॥ तत्र स स्वासने स्थित्वा शच्या सह प्रमोदितः ॥ सर्वान् देवान्समामंत्र्य पुनरेवमभाषत ॥ भवंतो त्र
विजानीध्वं यच्च्युतिलक्षणं मम ॥ तत्सर्वं प्रशमं यान्ति तन्मुनीन्द्रप्रसादतः ॥ पापं च क्षीयते शेषं पुण्यं
च मे प्रवर्द्धितम् ॥ न चापि दुर्गतिं यायां सुखावंतीं समाप्नुयाम् ॥ ॥ एतत्सर्वं मुनीन्द्रस्य कृ
पादृष्टिः प्रसादतः ॥ सिद्ध्यते मे भवद्भिस्तु ज्ञातव्या नान्यथा खलु ॥ एवं मत्वा भवंतोपि सम्बुद्ध शरणो
गता ॥ त्रिरत्न शरणं गत्वा भजध्वं नित्यमादरात् ॥ ततो वो मङ्गलं नित्यं सर्वत्रापि भवेद्ध्रुवम् ॥ क्रमा
त्पारमिता पूर्य्य बुद्धत्वं च समाप्नुयात् ॥ ॥ इत्यादिष्टं सुरेन्द्रेण श्रुत्वा सर्वेपि ते मराः ॥ तथाही

धर्म्मराज
३२

तिप्रतिज्ञाय चिरंतनं सम्प्रभेजिरे ॥ तदाभ्यस्य सदा तत्र स्वर्गलोके समंततः ॥ सुमंगलं महोत्साहं सदा
भूनिरुपद्रवं ॥ ॥ तदा शक्रः सुरेंद्रस तस्मै पंचशिखाय च ॥ ललितां भद्रिकां कन्यां तुष्टः
हृतनयां ददौ ॥ ज्ञानवन्तो हृते चिन्ता सुपकारकराः सताम् ॥ कदापि मक्षीयते नैव संचयक्षीयतेः
द्ध्रुवम् ॥ ॥ अथ शक्रस्तु भोज्जूतं दृष्ट्वा ते भिक्षवस्तदा ॥ सर्वे ते विस्मितानत्वा पप्रच्छुस्तं मुनी
श्वरम् ॥ भगवन् केन पुण्येन शक्रेणासु कृतं कृतम् ॥ येन च्युतोपि भूयोपि स्वासनं प्राप्तवानसौ ॥ इति
तैर्भिक्षुभिः सर्वैः सम्पृष्टः सः मुनीश्वरः ॥ सर्वांस्तान्सांघिकांश्चापि समालोक्यैवमादिशत् ॥ ॥
शृणुध्वं भिक्षवः सर्वे यच्छक्रेण पुराकृतम् ॥ तदहं श्रित प्रबोधार्थं कथयाम्यत्र सांप्रतम् ॥ पुराभूत

x

गुरु
३२

भगवान्बुद्ध ककुछन्दोभिधो जिनः ॥ सर्वज्ञः सुगतः शास्ता धर्म्मराजस्तथागतः ॥ सर्वसत्वोहितार्थेन शो
भावत्यां प्रशोवहि ॥ उद्याने सांघिकैः सार्द्धं व्यहारद्धर्म्ममादिशत् ॥ ॥ अथ स भगवान्स्तत्र बो
धिचर्याप्रकाशयेन ॥ समाप्य सौगतः कार्यं निर्वृत्तिं पदमाययौ ॥ तत्र शोभाभिधो राजा तस्य शास्तुः
यथाविधिः ॥ तं सरत्नमयं स्तूपं प्रतिष्ठाप्य यथाविधिः ॥ महश्चापि प्रतिष्ठाप्य महोत्साहमकारयत्
तत्र स नृपतिः शोभः प्राभ्यर्च्य तं जिनालयम् ॥ भक्त्या प्रदक्षिणीकृत्य प्रणत्वा प्रणतिं व्यधात् ॥ अनेन
कुशलेनेह भवेयान्त्रिदशाधिपः ॥ इह कृ शास्तारमाराध्य बोधिं वा समवाप्नुयात् ॥ ॥ इत्येवं
स महीपालः प्रणिधाय समाहितः ॥ सत्कारैः श्रद्धयानित्यं तत्र स्तूपं प्राभजन्मुदा ॥ तस्पूर्णं पूरण्य प्रणि

धानयोगात् प्राप्तः स राजा त्रिदशेश्वरश्च ॥ च्युतोपि भूयस्त्रिदिवे प्रयात तत्त्वामनास्थाप्य विहारसरा
म ॥ धर्म्मानुवद्धां भगवान् विभूतिमुक्तेति वाणीमनयत्प्रशांति ॥ निशम्य ते भिक्षुगणाश्च सर्वे चिर
न्तसेवानिरता बभूव ॥ ॥ यमाज्ञया स्वर्ग[illegible]गताश्च दूताः प्रत्यागताः पितृपतिं समब्रवीत्
॥ राजन्मशकानिहते च स्वर्गे चकारयामास स्वराज्यभोगम् ॥ इत्यादिवाच्यं प्रश्रुत्य तं परेतराट् अती
व आश्चर्य्यं बभूव भूयः ॥ ॥ इति श्रीविक्रमानंदविरचितायां धर्म्मराजकथायां यमद्वारानु
शंसा पञ्चमोध्यायः ॥ ५ ॥ अथानन्दो महाभिज्ञो भगवन्तं समब्रवीत् ॥ कृतान्तस्य राजद्वारानुशं
सावदमे विभो ॥ को गतानुगतो लोकः पश्यकः कोभविष्यति ॥ तत्सर्वं भगवन्मह्यं समुपादेष्टुमर्हति

॥इति विज्ञापितं श्रुत्वा उवाच भिक्षुसत्तमम्॥आनंद शृणु वृत्तान्तं कथयामि समासतः॥अस्ति धर्म
पुराख्याते धर्म्मकल्याभिधो नृपः॥तस्य पत्नी धर्म्मरती नाम्नी भूता पतिव्रता॥तस्यात्मजो धातृतेजो
धर्म्मात्मा सत्त्ववत्सलः॥ततश्चासौ धातृतेज अश्वमारुह्य निर्गतः॥स्वराज्यं द्रष्टुकामेन नगरान्नग
रमुपागमत्॥तदश्वेन परिहृत्य दूरदेशमनीयते॥ ॥ततश्चासौ राजपुत्रश्चंपके नगरे गमत्॥त
त्रासीदप्सरा वज्रुधा रम्यमानाति सुन्दरी॥तत्र गत्वा रतिक्रीडा समाश्रिता प्सरासहः॥तत्र त्यक्त्वा धातृते
जश्चानाम्नी नगरे गमत्॥ ॥तत्राप्यसौ राजपुत्र अप्सराभिरमाश्रितः॥तत्र त्यक्त्वा धातृतेजो
दक्षिणाभिमुखे गमत्॥तत्र वालुकाभूमौ प्रयातः सोतिविषादितः॥एकोजंतु तदागत्य राजपुत्रस्य स

न्निधौ ॥ नाश्वो न खरो नोष्ट्रो न गावो न च मह्नुकः ॥ जन्तुना तं धातृतेजमुवाच परिबोधितम् ॥ अतः समा
गतो धातृतेज त्वं कुत्र गच्छसि ॥ पृष्ठे मम मांगो आरोह स्तारयंत मवालुकात् ॥ ॥ इत्यादिष्टं धातृ
तेजः श्रुत्वा जन्तुं समभ्रवीत् ॥ जन्तो तमवालुकाम्भस्यं तार्य स्वदयानिधे ॥ इत्युक्त्वा धातृतेजो जन्तो रङ्गे
समारुहेत् ॥ नीयते जन्तुनातेन यमपूर्यां च सन्निधौ ॥ धातृतेजं तदा त्यक्त्वा जन्तुरन्तर्हितो ययौ ॥ तः
दासौ धातृतेजः शोकाति विस्मयान्वितः ॥ साम्प्रतं कुत्र गच्छामि को मां रक्षति विवादिनः ॥ तदाकाशात्
देवताभि धातृतेजं समभ्रवीत् ॥ धातृतेज कुतायातः कुत्र त्वं गम्यसे धुना ॥ ॥ मागच्छ धातृतेज
त्वं यमघोर कदाचनः ॥ इत्याकाशवाणीं श्रुत्वा धातृतेजः समभ्रवीत् ॥ कथमिदानीं निर्हतोस्मि मार्गं प्रत्या

गतंनहि ॥ तदाकाशाद्देवताभिः पुनरेवसमागतं ॥ निर्हृतस्त्वं धातुतेज स्वदेशं सह साधुना ॥ ततोसौ धा॰
तुतेज अप्रमाणितःसंस्थितः ॥ ॥ यमपुराज्ज्ञागत्य द्वारपालसमब्रवीत् ॥ कस्त्वं कुतः समाया
तः केनार्थेनसमागतः ॥ इतिविज्ञापितंश्रुत्वा धातुतेजसमब्रवीत् ॥ अस्ति धर्म्मपुराख्याने धर्मकल्या
भिधोनृपः ॥ तस्य पत्नी धर्म्मरती नाम्नीभूता पतिव्रता ॥ ॥ तस्यात्मजो धातुतेजो नाम्नोहं राज॰
नंदनः ॥ इत्यादिष्टं धातुतेजं द्वारपालःसमब्रवीत् ॥ केनार्थं धातुतेज यमद्वारे समागतः ॥ प्राणांते प्रा
णिनः सर्वे आयांति राजनंदन ॥ ॥ सञ्जीवत्वं धातुतेज निर्हृतः स्वपुरे धुना ॥ इतिविज्ञापितं॰
श्रुत्वा द्वारपालंसमब्रवीत् ॥ द्वारपालममवाक्यं शृणुतेसर्वथाधुना ॥ सञ्जीवेपिपितृपत्नु ईर्श्वनंकर्तुं

धर्मराज न्निधौ॥ नाश्वोनखरोनोष्ट्रो नगावोनचमह्लुकः॥ जन्तुनातंधातुतेजसुवाचपरिवोधितम्॥ कुतःसमा
३४ गतोधातुतेजस्त्वंकुत्रगच्छसि॥ पृष्टेममांगेआरोह स्नोर्यंतप्तवालुकात्॥ ॥ इत्यादिष्टंधातु
तेजःश्रुत्वाजन्तुंसमब्रवीत्॥ जन्तोतप्तवालुकाम्हंतारयस्वदयानिधे॥ इत्युक्त्वाधातुतेजोजन्तोरङ्गे
समारुरोहत्॥ नीयतेजन्तुनातेनयमपूर्याश्चसन्निधौ॥ धातुतेजंनदात्यक्त्वाजन्तुरंतर्हितोययौ॥ तदा
दासौधातुतेजःशोकातिविस्मयान्वितः॥ साम्प्रतंकुत्रगच्छामि कोमांरक्षतिविवादिनः॥ तदाकाशात्
र्म्मराजंमयादृष्टंसुहृज्जनाः ॥ तदासौधर्म्मराजोमेसुप्रसन्नैवमब्रवीत् ॥ ॥ जलदीपकिमर्थं

त्वंसजीवैवमिहागतः ॥ इत्यादिष्टंवचंश्रुत्वा तदाविज्ञापितंमया ॥ पञ्चसहस्रकलौगते गदेनप

रिपीडितः ॥ तन्द्रायांत्वक्षणान्द्वौयमदूतौसमागतौ ॥ एकोहिदहिनेपार्श्वे एकोहिवामपार्श्वके ॥ स्थि

त्वाचयम इत्यौ द्वौ हस्तं गृह्य सुनीयतम् ॥ इति मयोदितं श्रुत्वा धर्म्मराजस्तदाब्रवीत् ॥ षड्गतिभ्यश्च्युता
ये ते जातो भवन्ति मानुषाः ॥ तेषां देवादिसत्वानां मानुष्यजायतां तथा ॥ ॥ स्वभावाकारलिंगा
निः प्रवक्ष्यामि विशेषतां ॥ च्युत्वा ये देवलोकादिह मनुजगतौ सम्प्रजाता नराम्ते योगाचाररताः स
द्ग्रहणपटुमतयः सत्यधर्म्मानुरक्ता ॥ निःक्लेशादान्नचित्ता विजितकलिमताः सौम्यरूपाश्शुभांज्ञाः
सत्वानामर्थकाराः प्रमुदितमनसा हेमवर्णा भवंति ॥ ॥ च्युत्वा ये मर्त्यलोकादिह मनुजगतौ स
म्प्रजाता नराम्ते पुराणकर्म्मानुरक्ताः शुभगुणरतयः सत्यसंधा गुणाज्ञाः ॥ सत्वार्थोद्युक्तचित्ता गुरुज
न भजनोत्साहिनः शुद्धशीला दातारो धर्म्मकामाः पृथुतरसुधियो दक्षणीया भवन्ति ॥ ॥ च्यु-

त्वाये दैत्यलोकादिह मनुजगतौसम्प्रजाता नरास्ते तीव्राक्रोधाः सुवीराः प्रहरणगुणिनो युद्धकामाः
सुचिन्ताः॥ साहंकाराः प्रचण्डाः सुरगुणविरतादिव्यकांतापहारास्ते दुर्गन्धाः स्थूलकेशा पिशुनवि
वादिनामद्यमांसासिरागाः॥ ॥ निर्लज्जा भोज्यतृष्णाविगलितमनसः सत्यधर्म्मोतकाश्च भ्र
ष्टचाराविनष्टाः शुभगुणविरताः क्लिष्टितांगाभवन्ति॥ तिर्यग्भ्यो ये प्रजाता इह मनुजगतौ ते नराभ्रां
तचित्ता वाणिग्वृत्तिप्रसक्ता अविरतचरणक्लांतदेहा विसौचा॥ मिथ्याधर्म्मानुचारा मधुरसुवच
नावञ्चकाहीनसत्याः कोधेर्ष्या मानयुक्ता विरहितसुखता निर्विवेका भवंति॥ ॥ च्युत्वा ये
नारकेभ्यो मनुजगतिगतास्ते नराः सत्यहीना मात्सर्याक्रांतचित्ता अविनयवचना लोभमोहाक्र

लाशाः॥ भीतात्मानः कुशीलाविचलितहृदयाः पापसंपातमत्ताः दुःखार्त्ताः क्लेशमूढाः कुमतिवश
गतास्तत्वदुष्टाभवन्ति॥ ॥ इत्थं ते कर्मजाः सत्वाः सर्व्वे चै धातुकाश्रिताः॥ स्वकृतः कर्म्मभोग्या
निभुक्त्वा भ्रमंति सद्गतौ॥ शुभेन सद्गतौ जाताः सुखान्येव प्रभुंजते॥ पापेन दुर्गतौ जाता दुःखान्ये
व प्रभुंजते॥ कर्मणा मिश्रितेनैव भुंजंते सुखदुःखनाम्॥ सद्गतौ दुर्गतौ चापि जाता भ्रमंति सर्वदा॥
मत्वेति कृत्स्नकर्म्माणि मिश्रितानि च यत्नतः॥ हित्वा सदा शुभान्येवं कर्त्तव्यानि सुखार्थिभिः॥ कर्म्मः
भिः प्रेर्यमानाश्च स्वकृतः फलभोजिनः॥ संसारे सुखदुःखानि भुक्त्वा भ्रमंति सर्वदा॥ ॥ अवः
श्यमेव भोक्तव्यं यत्कृतं तत्फलं भवे॥ अभुक्तं क्षीयते नैव कर्म्म कापि कथंचन॥ अग्नौ नो दह्यते कर्मं

वायुभिर्नापिशुष्यते॥ क्लिद्यते न जलैश्चापि क्षीयते नैव भूमिषु॥ न नश्यंति हि कर्माणि कल्पकोटिशतैर
पि॥ सामग्रीं प्राप्य कालं च फलंति प्राणिनां खलु॥ इति मत्वा कुलदीपत्वं धर्म्मदानं कुरु सदा॥ इति॥
यमोदितं श्रुत्वा निर्हतोहं सुहृज्जनाः॥ ततो वहि अनंतादि नागराजाः समाश्रिताः॥ अनन्तवासुकि
तक्ष पद्मांश्चैव यथाक्रमात्॥ श्वेतनीलरक्तहरिता वर्णाश्च सुशोभिताः॥ ॥सर्वे ते नागराजा
नः सप्रफणा कृतांजलि॥ इति ते नागराजानो यस्मिन् पृथिवीमण्डले॥ विद्योतयंति काले हि काले॥
हि गर्जयंति च॥ निष्पादयंति शस्यानि काले हि वर्षयन्ति च॥ ॥पापिनः प्राणिनो दृष्ट्वा क्रो
धेन वेष्टयंति च॥ धर्म्मिणः प्राणिनो दृष्ट्वा कुर्वन्ति सन्मानिकम्॥ सर्वे ते नागराजानो मह्यं दृष्ट्वा समादि

शन्॥ किमायातोसिकलद्दीपसज्जीवैवयमालये॥ सदाते मंगलं भूयात् जीवरक्षांसदाभवेत्॥ ॥इ
त्याशीर्वचनंश्रुत्वा निर्हृतोहं सुहृज्जनाः॥ तदासुहृज्जनाः सर्वेकलद्दीपंसमब्रवीत्॥ यमस्यपूर्वद्वारस्य
महात्म्यंवदसत्तम॥ इतिविज्ञापितंश्रुत्वाकलद्दीपंसमादिशत्॥ सुहृज्जनायूयंसर्वे कथयामिसमा
सतः॥ ॥पूर्वदिशिस्थिताराजा धृतराष्ट्राभिधोनृपः॥ महर्द्धिकोमहावीरः सर्वशत्रून्निकृंतन
ः॥ महाक्रूरोमहारौद्रो महाभयभयंकरः॥ राजाधृतराष्ट्रेण महत्प्राकृयमब्रवीत्॥ पुष्यारामीवउत्कृष्टः
कौर्विकहनस्वरः॥ ॥मोरकोकिलनिर्घोषोमेघडुंडुभिगर्जितः॥ चतुःषष्ठीसहस्राणिगंधर्वाःप
रिवारकाः॥ निश्चितापूर्वदिग्भागे पीडयंतिमनुष्यकान्॥ गंधर्वाग्रहगणाग्रष्टा इहशंरूपलक्षणाम्॥

नृत्यते गायते चापि भूषणानि प्रियायते ॥ प्रलुब्धसत्यवादी च हसते कथ्यते पुनः ॥ तृषायते रक्तनेत्रौः
ज्वरोस्याद्विषमे सदा ॥ ॥ उन्मीलति च चक्षुश्च शयते च पराङ्मुखः ॥ भवंति इदृशं रूपं लक्षणांच
मनुष्यकान् ॥ तदा धृतराष्ट्रेण मह्यंदृष्ट्वा समादिशत् ॥ कुलदीपकिमायातः सञ्जीवैवयमालये ॥
इत्यादि एवं वचं श्रुत्वा तदा विज्ञापितं मया ॥ धृतराष्ट्र महाराज जीवरक्षां कुरु मम ॥ ॥ इति
विज्ञापितं श्रुत्वा धृतराष्ट्रः समादिशत् ॥ सदा ते मंगलं भूयात् जीवरक्षां सदा भवेत् ॥ इत्याशिर्वचनं श्रु
त्वा निर्वृतोहं सुहृज्जनाः ॥ ॥ तथास्मिन्पूर्वद्वारे च लोकपालेन्द्र संस्थितः ॥ देवाधिपं सुरेन्द्रेण
मह्यंदृष्ट्वा समादिशत् ॥ कुलदीपकिमायातः सञ्जीवैवयमालये ॥ इति तदुक्तमाकर्ण्य तदा विज्ञापितं

धर्म्मराज
७२

मया॥ देवराजसहस्राक्ष जीवरक्षांकुरुमम॥ इतिविज्ञापितंश्रुत्वा देवराजःसमादिशत्॥ सदातेमंगलं
भूयात् जीवरक्षांसदाभवेत्॥ ॥इत्याशिर्वचनंश्रुत्वा निर्हृतोहंसुहृज्जनाः॥ तदासुहृज्जनासर्वे
कुलदीपंसमब्रवीत्॥ यमस्यपूर्वद्वारेस्मिन् किंकिमस्तिवदस्वभो॥ इतिविज्ञापितंश्रुत्वा सुहृज्जनान्स
मादिशत्॥ ॥सुहृज्जनायूयंसर्वे शृणुध्वंकथयाम्यहं॥ क्वचित्पारिजातादि मालतीपुष्पपुः
ष्पितम्॥ क्वचिद्बकुलपुष्पादि पुष्पितंपरिशोभितम्॥ क्वचित्पाटलपुष्पादि पुष्पितंचसमन्ततः॥ क्वचि
द्बोधिवृक्षेण छादितंपरिशोभितम्॥ क्वचिन्न्यग्रोधवृक्षेण छादितंपरिशोभितम्॥ क्वचिच्चूतवृक्षे
ण छादितंचसुशोभितम्॥ क्वचिद्वटवृक्षेण छादितंपरिशोभितं॥ क्वचित्प्लक्षवृक्षेण छादितंपरिः

धरू:
७२

शोभितम्॥ कचिच्चंपकवृक्षेण छादितं परिशोभितम्॥ चैत्यादिशिवलिंगादिस्वस्वस्थानेसमाश्रिताः
॥पूर्वेस्थितायमद्भूता शांतेतिकरुणान्विताः॥जंबुकादिचजंतूनि वायसादितथैवच॥ ॥तस्मि
न्स्थानेरूप्यमयं राजगृहं चनिर्मितम्॥ तत्रासीद्धर्म्मचूडः सार्थवाहोमहर्द्धिकः॥दानधर्म्मानुभावे
न देवलोकाभिमानिनः॥अप्सराभिः समायाता सेवितासर्वदामुदा॥रसायनानि अन्नानि प्रभुक्ता
निसमाश्रितः॥कौशेयानिचवस्त्राणि प्रावृतंचसमाश्रितः॥सुवर्णादिभूषणानि मण्डितानिसमा
श्रितः॥ ॥एकदासौसार्थवाहो धर्म्मचूडः समादिशत्॥ ॥स्वडुःखडुःखंपाडुःखतोपि
सुखासुखसौख्येश्वपौः समानाः॥इत्थंनरायेसततंवदंति धर्म्मार्थकामापि मोक्षंलभंति॥धर्म्मेणाद्भवं

धर्म्मराज
७३

परिपूरयंति धर्म्मेण लक्ष्मी सततं वहंति ॥ धर्म्मेण लोका नृपति नयंती धर्म्मेण कामान् सहसा लभंते ॥ ८६
३० ॥ पुनश्च ॥ अनित्य संसारमनित्य कोषं अनित्यमोहं दिसपुत्रदारा ॥ अनित्य गेहं विविधोपभोग्यं सं-
सारके सर्वमनित्यमेव ॥ दानं विभूषणं लोके दानं दुर्गति निवारणं ॥ दानं स्वर्गस्य शोपानं दानं शांतिक-
रं सुखं ॥ ॥ इति तेनोदितं श्रुत्वा विस्मितो हं सुहृज्जनाः ॥ तदास्मै धर्म्मचूडाय अप्सराभिः समा-
दिशत् ॥ सार्थवाह धर्म्मचूड आगच्छ त्रिदशालये ॥ इत्युक्त्वा धर्मचूडाय नीयते त्रिदशालये ॥ एतत्सर्वं
मया लोकय निर्द्दृष्टो हं सुहृज्जनाः ॥ इत्युदाहृतं श्रुत्वा सुहृज्जनाः सुविस्मिताः ॥ ॥ इति श्री विक्र-
मानंद विरचितायां धर्म्मराजकथायां कुलदीप संज्ञायां यमस्य पूर्व भवान्प्रत्यागत प्रशंसा त्रयोदशो

गुरु
७३

अध्या अध्याय

ध्याय ॥ १३ ॥अथशास्त्राज्ञानदजो ब्रह्मदत्तं समादिशत्॥ तंद्रायां कुलदीपोसौ यमपुरात्सुनिर्वृत ॥
नदापुत्रपौत्रादि परिवृताः समंततः॥ सुहृज्जनाभिरागत्य परिवृताः समंततः॥ नदापुत्रपौत्रादीन्स
मालोक्य समादिशत्॥ ॥ कृतांतस्यपुरेगत्वा निर्वृतोहंसुहृज्जनाः॥ इत्यादिकं ववं श्रुत्वा वि॰
स्मिताः सुहृज्जनास्तदा॥ बंधुजनास्तदासर्वे कुलदीपंपर्यपृच्छत्॥ कीदृशीयमराजस्यपुरस्यमहिमांव
द ॥ इतिविज्ञापितं श्रुत्वा कुलदीपः समब्रवीत्॥ यमस्यदक्षिणाद्वारस्य माहात्म्यं कथयाम्यहं॥ ॥
इतिसमादितं श्रुत्वा ब्रवीषुः सुहृज्जनास्तदा॥ यमस्यदक्षिणाद्वारे [illegible] किंकिमस्तिसमादिशत्॥ इति
विज्ञापितं श्रुत्वा सुहृज्जनान्समब्रवीत्॥ सुहृज्जना यूयं सर्वे शृणुध्वं कथयाम्यहं॥ ॥ तत्रादौदक्षि

णे द्वारे पद्दवी लोहमयमभूत्॥ तन्मार्गे लोहकीलन्च कीलितं च समंततः॥ ॥ तथा च क्षुरधारो
पि प्रवर्त्तते समंततः॥ क्वचिन्मार्गे कण्ठकन्च प्रसारितं समंततः॥ क्वचित्तप्तवालुकां च प्रसारिता स
मंतताः॥ अङ्गाराणि क्वचित्तत्र प्रसारितानि समंततः॥ ॥ अस्मिंल्लोहकीलमार्गे सेतुछिन्निकपा
पिनं॥ यमदूतै गृहीत्वा वै शासनां च प्रकुर्वंति॥ अरे पापिन्त्वया पूर्वं सेतुछिन्नं प्रकुर्वितम्॥ इत्युक्त्वा
यमदूतैर्हि क्रम्यते क्षुरधारके॥ ॥ कीलेन पादतले विद्धा पापिलोक प्रक्रन्दते॥ तथा मार्गे क्षु
रधारे नीयते यमकिंकरैः॥ अरे पापिन्त्वया पूर्वं धर्ममार्गस्य नाशितं॥ इत्युक्त्वा पापिनं लोकं नीयते क्षु
क्षुरधारके॥ ॥ तदा पापिनो लोको हाहेवेति प्ररोदति॥ तथा पापिनं लोकं नीयते तप्तवालुके

पाशैर्वध्वा यमदूतैः शासनां च प्रकुर्वन्ति ॥ अरे पापित्वया पूर्वं प्रलिनश्च प्रणाशितम् ॥ इत्युक्त्वा यमदूः
तैर्हि पशुघ्नेन घ्नवालुके ॥ ॥ तदा पापिनो लोको हाताते ति प्ररोदति ॥ मया पूर्वं कृतं पापं फलं भु
क्ते गतिरोदितम् ॥ तथा च पापिनं लोकं अग्निकुण्डे प्रक्षिप्तितम् ॥ सर्वाङ्गश्च प्रदाहित्वा हामाते ति प्ररोद
ति ॥ अरे पापित्वया पूर्वं वनदाहं प्रकर्वितम् ॥ ॥ अनेन पापकर्मेण अग्निना दाहितं किल ॥ त
थाक्वचिल्लोहमयं सुरिं चापि सुनिर्मितम् ॥ तस्यां पापिनं लोकं समाश्रित्य दिवानिशी ॥ अरे पापित्वया
पूर्वं वालानां प्राणघातितम् ॥ ॥ इत्युक्त्वा यमदूतैर्हि दण्डेन ताडितं भृशम् ॥ तथा क्वचिल्लोहकुंभे
तैलं च पूरितं सदा ॥ तत्कुंभे पापिनं लोकं प्रक्षिप्तं क्वथितं सदा ॥ तदा पापिनो लोको हा दैवेति प्ररोदितम् ॥ अ

रे पापिन्त्वया पूर्वं सांघिकं द्रव्यमूषितम् ॥ एतत्कर्म्मविपाकेन तैलकुंभे प्रक्वथितम् ॥ इत्युक्त्वा यमदूतैर्हि ः
प्रक्षिप्तं तैलकुम्भके ॥ तथा च विरामूत्रकुण्डे प्रक्षिप्तं पापिनं क्वचित् ॥ तत्रस्थपापिनो लोको हा मातेति प्र
रोदितम् ॥ ॥ तदा यमदूतैर्हि प्रोवाच पापिनं ततः ॥ अरे पापिन्त्वया पूर्वं पाद्रव्यं प्रहारितम् ॥ एतत् ः
त्कर्म्मविपाकेन निमग्नं विरामूत्रके ॥ तथा जलौककुण्डे प्रक्षिप्तं पापिनं सदा ॥ ॥ तत्रस्थपापि
नो लोको हा दैवेति प्ररोदितम् ॥ तदा यमदूतैर्हि प्रोवाच पापिनं ततः ॥ अरे पापिन्त्वया पूर्वं पाद्रव्यं प्रमूषि
तम् ॥ ॥ एतत्कर्म्मविपाकेन जलौकया प्रभक्षितम् ॥ क्वचित्पापिनं लोकं सर्पकुण्डे प्रक्षिप्तिनः
म् ॥ तत्रस्थपापिनो लोको वक्तुन्नापि प्रशकाते ॥ अरे पापिन्त्वया पूर्वं पाद्रव्यं प्रमूषितम् ॥ ॥ एतत्

कर्मविपाकेन सर्प्येनापि प्रदष्टितम् ॥ एतत्सर्वं मया लोक्य निर्वृतोहं सुहज्जनाः ॥ सुहज्जनास्ततः सर्वे कुल
दीपं समब्रुवीत् ॥ अन्यैरपि कुलदीप यमकथां वद प्रभो ॥ इति विज्ञापितं श्रुत्वा कुलदीपः समादिशत् ॥
सुहज्जना यूयं सर्वे शृणुध्वं च समाहिताः ॥ कश्चिच्च पापिनं लोकं मांसं श्वानेन भक्षितम् ॥ ॥ कश्
चिच्च पापिनं लोकं मांसं व्याघ्रेण भक्षितम् ॥ कश्चिच्च पापिनं लोकं मांसं काकेन भक्षितम् ॥ कश्चिच्च पापि
नं लोकं मांसं गृध्रेण भक्षितम् ॥ ॥ क्रोष्टुना पापिनं लोकं मांसं कश्चिच्च भक्षितम् ॥ कश्चिच्च पापि
नं लोकं वाराशयने प्रसुप्तितम् ॥ कश्चिच्च पापिनं लोकं वृश्चिकेन प्रदष्टितम् ॥ ॥ ततो नरकपाला
श्चरात्रिंदिवं भ्रमंति च ॥ केचि घ्याघ्रमुखाकृताः केचित्सिंहमुखास्तथा ॥ केचित्सर्पमुखाकृताः केचित्क्रोल

धर्म्मराज ७६

मुखास्तथा॥ केचित्श्वानमुखाङ्गनाः केचेत्गृध्रमुखास्तथा॥ केचित्क्रोष्टुमुखाङ्गनाः केचित्काकमुखास्त
था॥ केचित्स्थूलनयनाः केचिदूर्ध्वशिरोरुहाः॥ ॥ केचिद्दूतास्थूलदंष्ट्राः केचिद्दूताभयंकराः॥ एः
तैईतैः शतसहस्रैर्भ्रमंतिनारकेखलु॥ एतत्सर्वंमयालोकय निर्दृतोहंसुहृज्जनाः॥ कफपूयमांसरक्त अ
स्थिमज्जाप्रवाहिताम्॥ श्वानजम्बूकवलिभुक् गृध्राद्दिभिर्निवासिताम्॥ ॥ वैतरणीमितिख्यातं न
दीमयावलोकितम्॥ तन्नद्यांयमदूतैर्हि पापिनश्च प्रवाहितम्॥ एतत्सर्वंमयालोकय निर्दृतोहंसुहृज्जनाः
॥ इतिप्रभाषितंश्रुत्वा विस्मितास्सुहृज्जनास्तदा॥ ॥ पुनरपिकुलदीपः सुहृज्जनंसमादिशत्॥ येचा
पिपापिनोलोकाः प्रमुष्यंतिपरधनं॥ तेगृहीत्वायमदूतैर्वधागारेप्रवेशंति॥ हस्तपादौपरिगृह्य लोहस्तंभेप्र

गुरु ७६

वंध्यन्ति॥ये चापि पापिनो लोकाः प्रमुष्यंति परान्नकं॥ते च मुखे अयोगुडं प्रक्षिप्यं शासनां किलः॥ये चापि पा

पिनो लोकाः गुरू निंदां करोति च॥ते हृदये यमदूतैः कुठारेणा प्रहन्यते॥ ॥ये चापि पापिनो लोकाः

परकथां शृणोति हि॥ते च श्रोत्रे यमदूतै लोहसूकं प्रविद्धते॥ये चापि पापिनो लोकाः परहिंसां करोति च

॥ते जीवं हरेत् दूतैः रग्निकुण्डे प्रक्षिप्तन्ति॥ ॥ये चापि पापिनो लोकाः शिशुघातं करोति हि॥जलौ

ककुण्डे प्रक्षिप्यं शासनां च प्रकुर्वन्ति॥ये चापि पापिनो लोकाः पितृद्रव्यं प्रमुष्यन्ति॥ते च मुखे यमदूतैः

लोहकीलं प्रकीलन्ति॥ ॥तथा माता पिता भ्रातृ वंधु मित्रान् प्रभिन्नन्ति॥ते च पापिनो लोका न

रकुण्डे प्रक्षिप्तन्ति॥ते च अंगे कृमिकीटैः प्रदष्टं सर्वदा किलः॥तस्माद्ये मनुष्य लोकाः पानैव प्रकारये

क पं

धर्म्मराज ७७ त् ॥ इति प्रभाषितं श्रुत्वा सुहृज्जनाः सुविस्मिताः ॥ पुनरपि कुलदीपः सुहृज्जनान्समादिशत् ॥ यमपू:
र्यां यक्षगणैः परिवृताः समाश्रिताः ॥ कपिलाक्षं रक्तकेशमं रक्तवर्णं भयंकरं ॥ ॥ पापिलोकान्स
मागृह्य भक्षंति यक्षराक्षसैः ॥ ततो वहिः अनंतादि नागराजाः समाश्रिताः ॥ अनन्तवासुकितक्षपद्मा
श्चैव यथाक्रमात् ॥ ॥ शांतनीलरक्तहरिता वर्णाश्च सुशोभिताः ॥ सर्वे ते नागराजानः सप्त:
फणाः कृताञ्जलि ॥ इत्येते नागराजानो यस्मिन् पृथ्वीमण्डले ॥ विद्योतयंति काले हि काले हि गर्जयंति गुरू
च ॥ निष्पादयंति शस्यानि काले हि वर्षयंति च ॥ ॥ पापिनः प्राणिनो दृष्ट्वा क्रोधेन वेष्टयंति ७७
च ॥ धर्म्मिणः प्राणिनो दृष्ट्वा कुर्वन्ति सन्मानिकम् ॥ सर्वे ते नागराजानो मह्यं दृष्ट्वा समादिशत् ॥ किमा

यानोसि कलदीप सञ्जीवैवयमालये ॥ सदा ते मंगलं भूयात् जीवरक्षां सदा भवेत् ॥ इत्याशिर्वचनं कृत्वा ऽ
निर्द्वतोहं सुहृज्जनाः ॥ ॥ नदा सुहृज्जनाः सर्वे कलदीपं समब्रुवीत् ॥ यमस्य दक्षिणद्वारस्य महा
त्म्यं वद सत्तम ॥ इति विज्ञापितं कृत्वा कलदीपः समादिशत् ॥ सुहृज्जना यूयं सर्वे कथयामि समासतः ॥
दक्षिणदिशि स्थिता राजा विरूढकाभिधो नृपः ॥ ॥ महर्द्धिको महावीरः सर्वशत्रुनिकृन्तनः ॥
महाक्रूरो महारौद्रो महाभयभयंकरः ॥ राजा विरूढकेनापि मह्यं प्राज्ञ्य यमब्रवीत् ॥ एष्यरासीव उत्कु
ल कलविंकरुतस्वरः ॥ ॥ मोरकोकिलनिर्घोषमेघदुंदुभिगर्जितः ॥ चतुःषष्ठी सहस्राणि कुं ऽ
भाण्डाः परिवारकाः ॥ निश्चिना दक्षिणे भागे पीडयंती मनुष्यकान् ॥ ॥ कुम्भाण्डाग्रहगणा ग्रष्टाई

धर्म्मराज ७८

दृशंरूपलक्षणम्॥ वलवतितृषाभोग्नि विभ्रांतश्चापिप्रेक्षते॥ मुखंलोहितमाभातिभूमौस्वपितिकांचितः॥

दुर्वर्णाकृषगात्रश्च दीर्घकेशनखस्तथा॥ ॥दुर्गंधामलिनश्चापि मृषासंभिन्नभाषते॥ भवंतीदृ

ग्दृशंरूपंलक्षणंचमनुष्यकान्॥ तदाविरूढकेनापि महंदृष्टासमादिशत्॥ कुलदीपकिमायातःसञ्ज्ञी

वैवयमालये॥ इत्यादिष्टंवचंश्रुत्वा तदाविज्ञापितंमया॥ ॥विरूढकमहाराजजीवरक्षांकुरुष्म

म॥ इतिविज्ञापितंश्रुत्वा विरूढकंसमादिशत्॥ सदातेमंगलंभूयात् जीवरक्षांसदाभवेत्॥ इत्याशिर्वच

नंश्रुत्वा निर्हृतोहंसुहृज्जनाः॥ ॥तदासुहृज्जनाःसर्वे कुलदीपंसमब्रुवीन्॥ यमस्यदक्षिणाद्वारे गुरू ७८

स्मिन् किंकिमाग्निवदस्वभो॥ इतिविज्ञापितंश्रुत्वासुहृज्जनान्समादिशत्॥ सुहृज्जनायूयंसर्वेश्रृणुध्वंक

थयाम्यहं॥ असिपत्रेति विख्यातो महारण्यास्ति दक्षिणे॥ साल्मल्यादिपादपानि समंततः प्रछादितम्॥
अस्मिन्वृक्षे वायसादिपक्षिभिः प्रतिकूजितम्॥ ॥जम्बुकादिवजंतूनि कूजितं रोदितं सदा॥
तस्मिंस्थाने लोहमयं राजगृहं च निर्म्मितम्॥ तत्रासीद्यमराजो महर्द्धिको भयंकरः॥ लोहिताक्षस्थूल
तनुः कृष्णवर्णो महाबलः॥ ॥यमदण्डं यमपाशं धारितं च भयानकम्॥ तत्रैकोस्ति महापापि लु
ब्धकः पशुहंन्यकः॥ तं दृष्ट्वा यमराजेन यमदूतान्समादिशत्॥ समागृह्य लुब्धकाय अयोगृहे प्रवेश्यताः
म्॥ इति यमोदितं श्रुत्वा लुब्धकं तु प्रवेशितम्॥ ॥तत्प्रवेशितमात्रेण काकपक्षिसमागतः॥ शि
रसि चंचुनाकृष्टा मज्जां निष्कास्य भक्षितम्॥ गृध्रैरपि समागत्य मज्जां निष्कास्य खादितम्॥ श्वानैरपि समाः

धर्म्मराज
७९

गत्य नेत्रं निष्कास्य भक्षितम् ॥ ॥ व्याघ्रेणापि समागत्य मांसरक्तं प्रभक्षितम् ॥ अन्य अन्यैः पक्षिगणैः
समागत्य तथैव च ॥ मांसशोणितमज्जादि भक्षितं सम्प्रतिष्ठितम् ॥ इनैरपि समागत्य लुब्धकं तं समब्रवी
न् ॥ ॥ अरे पापि त्वया पूर्वं वहुभिः पक्षिघातितं ॥ अनेन पापकर्म्मणा इदृशी शासनां भवेत् ॥ इत्यु
क्ता इन्द्रगणैः सर्वैः पाशेन प्रतिवध्यते ॥ लुब्धकं तं समागृह्य दण्डेनापि प्रताडितम् ॥ ॥ तदासौ लु
ब्धक पापि महा दैवेति प्ररोदिन ॥ तदाकाशादेवताभिर्लुब्धकं तं समादिशान् ॥ यथा त्वया पक्षिघातं पक्षि
भिर्घातितं तथा ॥ ॥ कदापि च पक्षिघातं कर्म्मच्चैव न कारयेत् ॥ इत्युदीरितं श्रुत्वा लुब्धकः पुन
रोदितम् ॥ एतत्सर्वं मया लोक्य निर्हतोहं सुहज्जनाः ॥ इत्युदाहृतं श्रुत्वा सुहज्जनाः सुविस्मिताः २६

गुरुः
७९

३० ॥इतिश्रीविक्रमानन्दविरचितायांधर्म्मराजकथायांतंद्रायांकुलदीपयमस्यदक्षिणद्वारान्स्त्याग
तप्रशंसाचतुर्दशोध्यायः॥ १४ ॥पुनःप्राहज्ञानदन्तोब्रह्मदत्तंस्वशिष्यकम्॥तन्द्रायांकुलदीपोसौयमपु
रान्सुनिवृत्तेः॥तदापुत्रपौत्रादिंसमालोक्यप्रतिष्ठितः॥ ॥सुहृज्जनान्समालोक्यकुलदीपःसमादिशत्॥कः
तांतस्यपुरेगत्वानिर्वृतोहंसुहृज्जनाः॥इत्यादिस्थंवचंश्रुत्वाविस्मितोसुहृज्जनास्तदा॥तदासुहृज्जनाःसर्वेकुल
दीपंपर्यपृछन्॥कुलदीपयमपुरस्यभावस्वमहिमांखलु॥ ॥इतिविज्ञापितंश्रुत्वाकुलदीपःसमा
दिशत्॥तत्रादौपश्चिमेद्वारेपदवीताम्रमयिमभूत्॥तस्मिन्मार्गेअप्सराभिवहुभिश्चसमाश्रिताः॥काभिर्जल
घटंगृह्यकाभिश्चवालव्यंजनम्॥काभिःपुष्पमालाभिगृहीत्वाचसमाश्रिताः॥ ॥काभिधर्म्मध्वजंक्षत्रं

चामलं सगुणांस्तथा ॥ काभिः फलमूलादि गृहीत्वा च समाश्रिताः ॥ ॥ तथा किन्नरकन्याभिर्गीयमानं सु
गीतकं ॥ तथान्ये गंधर्वकन्याभिः नानावाद्य प्रवादिताः ॥ तथा देवकन्याभिर्नानास्तोत्रं प्रकीर्तितं तथा च पश्चि
मे द्वारे धर्मशालां सुनिर्मितम् ॥ ॥ तथा बुद्धधर्म्मसंघं प्रतिबिंबं सुनिर्म्मितम् ॥ अनेकदेवालयं श्चा
पि निर्मितं च समंततः ॥ तथा धर्मदानशाला निर्मिता च समंततः ॥ वापीपनारीधाराणि निर्मिता च समंतः
ता ॥ ॥ तथा क्वचित् सिंहध्वजं निर्मितं प्रतिसंस्थितम् ॥ तथा क्वचिन्मयूरध्वजं निर्मितं च समंततः ॥
तस्मिन्द्वारे रत्नमयं राजगृहं सुनिर्मितम् ॥ राजगृहं कथंभूतं नानारत्नैः प्रपूरितम् ॥ ॥ स्वर्णरूप्यमय
स्तंभं सोपानं च तथैव च ॥ वातायनं तोरणं च स्वर्णमयं सुनिर्मितम् ॥ पटलानि च स्वर्णानि शोभितानि समं

ततः॥सुवर्णरत्नध्वजादिपटाकंचप्रलम्बितम्॥सुवर्णरूप्यसूत्राणिवेष्टितानिवहितथा॥इदृशेवराजगृहेती ४
र्थिकाश्चयस्थिताः॥कणठकापाश्रयान्केचित्केचित्भस्माश्रयान्ऋषीन्॥उर्द्ध्वपादांअधोहस्तांपञ्चाग्नि
तापितान्क्वचित्॥ ॥केचिन्नग्नान्विरूक्षांगान्जटिलान्क्षीणकायिकान्॥एवंकष्टतपस्तप्ता
न्सर्वांस्तान्ऋषिपुंगवान्॥तान्दृष्ट्वानत्रगत्वामयासंप्रार्थितंऋषीन्॥ ॥ऋषिजनायूयंसर्वैः
किमर्थंकष्टमाश्रितम्॥इतिमयोदितंश्रुत्वाऋषिजनैःसमादिशत्॥साधोयदत्रसंसारेभवसिंदीपसंनिभ
ः॥यशोवलक्षणारोग्यगुणसम्पन्नसमृद्धिमान्॥ ॥एतत्सर्वंविजानीहियत्त्वयाश्रद्धयापुरा॥सुक्षेत्रे
सुसुपात्रेषुप्रदत्तंतत्फलंत्विदं॥सुक्षेत्रंसौगतंक्षेत्रंसुपात्रंबौद्धसाधिकं॥इतिसर्वमुनीन्द्रैर्हिसर्वज्ञैःसंप्र

चक्षते॥ तत्त्रयस्य कृतं पुण्यं न क्षीयते कदाचन॥ क्रमाद्वृद्धिं समाप्नोति तत्फलं बहुसम्पदम्॥ इति मत्वा कु
लदीप त्वं त्रिरत्नं सरणं गतः॥ सुयात्रे सौगते क्षेत्रे संप्रदातुं समर्हसि॥ ॥यः श्रद्धया त्रिरत्नानि भज
ति सरणं गतः॥ सर्वपापविनिर्मुक्तः स याति सद्गतिं सदा॥ क्रमाद्बोधिचर्यां प्राप्य परिशुद्धत्रिमण्डलः॥ शि
वां बोधिं च संप्राप्य निर्वृतिं वा समाप्नुयात्॥ ॥इति मत्वा कुलदीप यदीच्छसि सदा सुखं॥ त्रिरत्नं
श्रद्धयाभ्यर्च्य भज नित्यं समाहितः॥ अनित्यं खलु संसारे श्रीसंपदं च चंचला॥ क्षणध्वंसि शरीरं च जीवितं च
ह्यनवस्थितं॥ ॥मानुष्यं दुर्लभं जन्म क्षणसम्पच्च दुर्लभं॥ इति मत्वात्र संसारे दानं कर्तव्यमादरा
त्॥ दानेन दुर्गतिं हित्वा सद्गतिं सर्वदा व्रजेत्॥ दानेन वर्द्धते लक्ष्मीः संबोधिं वा समाप्नुयात्॥ दानेन शुध्यते चि

नंशुद्धचित्तो भवेत्सुधीः॥ सद्भिर्समयासुक्तः क्षांतिमान्वीर्यवान्कृति॥ दसक्लेशारिसंघाश्च निर्जित्यमारजिन्न
वेत्॥ ॥निःक्लेशात्सुविशुद्धात्मा योगी ध्यानात्सुसंयमी॥ यतिः प्रज्ञापरितात्मा प्रज्ञाउपायविद्वरः॥ य
त्नज्ञो मतिमान्वोधिप्रणिधानं समाप्नुयात्॥ वोधिप्रणिधिचित्तश्च मारजित्सुर्वली भवेत्॥ ॥त्रैलो
क्यविजयावारे वोधिसत्वोगुणात्सुधीः सर्वज्ञज्ञानवान्प्राज्ञो दशभूमीश्वरो भवेत्॥ ततः संवोधिमासाद्य
संवुद्धपदमाप्नुयात्॥ ॥इतिमत्वाकुलदीप यदि वोधिं समीहसि॥ त्रिरत्नभजनं कृत्वा सदार्थिन
प्रतर्प्पय॥ स्वार्यशीलव्रतं धृत्वा सत्वान्धर्मे निवेशयेत्॥ क्षमं धृत्वासुमेकार्ये प्रोद्यमसत्वसमाहितः॥ ॥
स्वेष्टदेवान्समभ्यर्च्य प्रज्ञारत्नमुपार्जयः॥ प्रयत्नेनापि संवोधिप्रणिधिसागरंतरः॥ वलेन दुर्जनाञ्जित्वाज्ञा

धर्म्मराज
८२

नद्रव्यंचित्तुश्रुवं ॥ तेनापिसर्वसत्वास्त्वं परितोष्यप्रवोधनम् ॥ वोधिमार्गे प्रतिस्थाप्य पालयस्वसदादरात्
॥ स्वयंचसंवरं धृत्वा चरनित्यंसमाहितः ॥ तदातेमंगलंनित्यंसर्वत्रापिभवेध्रुवं ॥ ॥ क्रमाद्वोधिंस
मासाद्य वोधिसत्वोभविष्यति ॥ ततोलोकहितंकृत्वा स्वयंभुक्त्वासुखंसदा ॥ मारपाशविनिर्मुक्त प्रान्तेयाः
याःसुखावनीम् ॥ इत्यस्मत्वचनंश्रुत्वा कृत्वानुमोदनंसदा ॥ ॥ चिरन्तसंस्मरंनित्यं सर्वलोकहि
तंचरः ॥ इतितैर्गदितंश्रुत्वा निर्वृत्तोहंसुहृज्जनाः ॥ तदासुहृज्जनाःसर्वे कुलदीपंसमब्रुवन् ॥ यमस्यपश्चि
मद्वारस्य माहात्म्यंवदसत्तमः ॥ ॥ इतिविज्ञापितंश्रुत्वा कुलदीपसमादिशत् ॥ सुहृज्जनायूयं
सर्वे कथयामिसमासतः ॥ पश्चिमदिशिस्थिताराजा विरूपाक्षाभिधोनृपः ॥ महर्द्धिकोमहावीरसर्वशत्रूनि

गुरु:
८२

हंतनः ॥ महाक्रूरो महारौद्रो महाभयभयंकरः ॥ राजा विरूपाक्षेण मत्संप्राप्य यमब्रवीत् ॥ पुष्पराशीवउत्क्रु
ह्ल कलविंकरूतस्वरः ॥ ॥ मोर कोकिल निर्घोष मेघदुंदुभिगर्जितः ॥ चतुःषष्टीसहस्राणी सुपः
र्णाः परिवारकाः ॥ निश्चिताः पश्चिमेभागे पीडयंति मनुष्यकान् ॥ सुपर्णाग्रहगणाग्रस्ता इदृशं रूपलक्षण
णम् ॥ ॥ हिक्कते श्वासते चापि शीतलं गात्रमेव च ॥ स्विद्यते फेनलालाश्च श्वपते न पुनः पुनः ॥ वर्ण
वान् भवति स्मरो वेपते धावते तथा ॥ पुनर्नेत्राक्षिदर्शयति महिं विंशति रोदिति ॥ भवंति ईदृशं रूपं लक्षणं
च मनुष्यकान् ॥ तदा विरूपाक्षेण मत्संदेष्ट्रा समादिशत् ॥ ॥ कलदीपकि मायात सञ्जीवेवं
यमालये ॥ इत्यादिष्टं वचं श्रुत्वा तदा विज्ञापितं मया ॥ तंड्रायां यमदूताभ्यां नीयते मे यमालये ॥ विरूपा

समहाराज जीवरक्षांकुरुममम ॥ इति विज्ञापितं श्रुत्वा विहस्याससमादिशत् ॥ सदा ते मंगलं भूयात् जीव
रक्षां सदा भवेत् ॥ इत्याशिर्वचनं श्रुत्वा निर्गतो हं सुहृज्जनाः ॥ ॥ तदा सुहृज्जनाः सर्वे कुलदीपं
पर्यपृच्छत् ॥ यमस्य पार्श्वे मे द्वारे किं किमस्ति वदस्वभो इति विज्ञापितं श्रुत्वा कुलदीपः समादिशत् ॥ ः
ज्ञानकेतुः समाख्यातो भिक्षुरेकः समाश्रितः ॥ ॥ भिक्षुणा मे समालोक्य दिदेशा धर्म्मसुत्तमं ॥ दे
वो वा देवालयं वा जीर्णोद्धारं कृतं महत् ॥ जीर्णोद्धारस्य पुण्येन हरति यमशासनं ॥ सद्धिवलसमायुक्तश्च
क्रवर्त्तिसमो भवेत् ॥ ॥ पुण्यवान् बलवान् भूत्वा न तस्य विकलेन्द्रियः ॥ नतश्चाने सुखं त्वो भुंसं
वुद्धत्वं प्रजायते ॥ इत्यादिष्टं ववं श्रुत्वा निर्गतो हं सुहृज्जनाः ॥ ॥ देवालयें स्वगृहे स्यं जीर्णोद्धा

रंमयाकृतम् ॥ देवालयंकथंभूतंचैत्याकारंसुलक्षणम् ॥ मध्येवैरोचनंशून्यंपूर्वेअक्षोभ्यसौगतम् ॥ दक्षि
णेरत्नसंभवंअमिताभंचपश्चिमे ॥ ॥ उत्तरेमोघसिद्धिश्चवज्रसत्वंवसुंधराम् ॥ आर्य्यतारलोक
नाथंमञ्जुश्रियंसरस्वतीम् ॥ प्रज्ञापारमिताजननीप्रस्थापितांमयाखलु ॥ इत्युदाहृतंश्रुत्वासुहृज्जनाः॥
प्रबोधिताः ॥ अहोधर्म्मअहोपुण्यअहोधर्म्मस्यभावतः ॥ सज्जीवेवंयमद्वारात्प्रत्यागतोमहर्द्धिकः ॥ इत्यु
दाहृतंश्रुत्वासुहृज्जनाःसुविस्मिताः ॥ ॥ इतिश्रीविक्रमानंदविरचितायांधर्म्मराजकथायातं
ड्रायांकुलदीपयमस्यपश्चिमद्वारात्प्रत्यागतप्रशंसापंचदशोध्यायः ॥ १५ ॥ अथाब्रवीत्ज्ञानद
तोब्रह्मदत्तंस्वशिष्यकम् ॥ तन्ड्रायांकुलदीपोसौयमपुरात्सुनिर्वृतः ॥ तदापुत्रपौत्रादिन्समालोक्यप

निश्चितः ॥ सुहृज्जनान्समालोक्य कुलदीपः समादिशत् ॥ कृतांतस्य पुरे गत्वा निर्वृतो हं सुहृज्जनाः ॥
इत्यादिष्टं वचं श्रुत्वा विस्मिताः सुहृज्जनास्तदा ॥ तदा सुहृज्जनाः सर्वे कुलदीपं पर्यपृच्छत ॥ ८६
ः७ ॥ कुलदीप यमपुरस्य वदस्व महिमां खलु ॥ इति विज्ञापितं श्रुत्वा कुलदीपः समादिशत् ॥ प्रा
सौ चोनरद्वारस्य प्रशंसां कथयाम्यहं ॥ श्रूयतां सुहृज्जनास्सर्वे चोत्तरे गमनं कथाम् ॥ ॥ आ
सौ चोत्तरे द्वारे पदवी स्वर्णमयी मभूत् ॥ तत्रासीत्यादि जातादि मालती पुष्प पुष्पितम् ॥ तथान्येप
द्मोत्पलं पुष्पं पुष्पितं च सरोवरम् ॥ ॥ तत्र निवासिनः पक्षि राजहंसादि कूजितम् ॥ को
किलादि मयूरैश्च कूजितं सततं तथा ॥ क्षीरखंडादिकर्पूरैश्च सिंचितं मार्गमेव च ॥ तत्र मार्गेः

सुगंधादि वायुना परिवाहिता॥ अनेगसुगंधधूपं धूपितं च समंततः॥ षोडशैर्वर्षसंयुक्तैः स्पराभिर्निः
वासिता॥ ॥कीदृशा स्पराभिः रम्यमानातिसुंदराः॥ नवयौवनसम्पन्ना कामरसैः समंन्विताः
॥गृहीना चामरैः काभिः गृहीता वाल व्यंजनैः॥ गृहीता कुंलशैः काभि गृहीतासयुरौस्तथा॥ ॥गृ
हीता पुष्पमालाभि गृहीता पुंगतांवुलैः॥ गृहीता ध्वजपटाभि गृहीता सर्वमंगलैः॥ इदृशा अस्परासः
र्वा मार्गेमार्गेसमाश्रिता॥ ॥तथान्ये देवकन्याभि नांगकन्याभिः संस्थिताः॥ तथा गंधर्वकंन्याभि
गीयमाना प्रतिस्थिताः॥ तथा किन्नरकन्याभिः नृत्यंना परिसंस्थिताः॥ ॥अनेनचसुमार्गेणागं
नव्यंराजमंदिरं॥ राजगृहं कथंभूतं स्वर्णरूप्यं च निर्मितम्॥ नवरत्नादिखचितं वातायनं च शोभितम्॥

धर्मराज
८५

स्वर्णारूप्यमयंस्तंभंसोपानंचसुशोभितम्॥ सुवर्णरत्नमयंच सिंहासनंचस्थापितं॥ अस्मिन्नेवराजगृ
हेधार्मिकंनीयतेजनम्॥ ॥समंत्रिधर्म्मराजोपिचागन्यसहस्रातथा॥ धार्मिकंधर्मराजेनसांज
लिनानिवेदितम्॥ भवंतश्चागतादृष्टंआगतोस्मिस्वहंकिल॥ ॥इत्यादिष्टंकृतांतेननीयतेधा
र्मिकंजनं॥ तदामार्गेसमासीनाअप्सराभिश्चपूजिताः॥ अनेकफलपुष्पादिसमर्प्पितंस्तथाखलु अ
मृतादिजलैंपानैःर्पितंधार्मिकंजनम्॥ ॥खाद्यभोज्यादिपानादिसमार्पितंस्तथाखलु॥ धा
र्मिकंधर्म्मराजेनराजगृहेप्रवेशितम्॥ मणिमुक्तादिखचितंसिंहासनेप्रतिष्ठितम्॥ तदायमराजोसौ
धार्म्मिकंतंसमब्रवीत्॥ ॥षड्गात्यांजायतेजंतोधर्ममेवप्रशास्यते॥ धर्म्महीनश्चपापिनंच:

गुरुः
८५

नारकेनीयतेखलु॥धर्मेणावर्द्धतेज्ञानं धर्मेणआयुवर्द्धते॥धर्म्मेण प्राप्यते मोक्षं धर्म्मेणधनवान्भवेत्॥
धर्म्मेणानीयतेस्वर्गं पापेननरकंव्रजेत्॥ ॥इत्यादिष्टंकृतांतेन श्रुत्वातेधार्मिकोजनाः॥धर्म्मरा
जस्यपादाब्जे प्रणत्वासरणोगताः॥एतत्सर्वंमयालोकानिर्वृतोहंसुहृज्जनाः॥तदासुहृज्जनाःसर्वेकुः
लदीपंसमब्रवीत्॥ ॥यमस्योनराह्वास्य माहात्म्यंवदसत्तम॥इतिविज्ञापितंश्रुत्वाकुलदीः
पंसमादिशत्॥सुहृज्जनायूयंसर्वेकथयामिशृणुध्व॥ ॥उत्तरदिशिस्थितोराजा वैश्रवणा
भिधोनृपः॥महर्द्धिकोमहावीरःसर्वशत्रुनिकृंतनः॥महाक्रूरोमहारौद्रोमहाभयभयंकरः॥राजावैः
श्रवणेनमहद्दंडस्त्वासमब्रवीत्॥ ॥पुष्पराशीवउत्फुल्ल कलविंकहतस्वरः॥मोरकोकिल

निर्घोषो मेघदुंदुभिगर्जितः॥ सुमेरुं कंपयित्वा तु धरणीं परिवर्त्त्य च॥ वंधयिष्यामः पाशेन चन्द्रसू
र्यौ तथानिलं॥ ॥चतुःषष्ठीसहस्राणि यक्षग्रहाः परिवारकाः॥ निश्चिता उत्तरे भागे पीडयंति॥
मनुष्यकान्॥ यक्षग्रहगणाग्रस्ता इदृशं रूपलक्षणम्॥ हसंति त्रसते भक्ष्यं प्रलंपश्चविकुर्व्यति॥ ९
० ॥निद्रांश्चापि सतेन तस्य सूरोवावुपजायते॥ उर्द्ध संप्रेक्षते नित्यं नक्षत्राण्यनुधावति॥ राज्ञो प्रहर्ष
मायाति वेपते स्तंभते सदा॥ तदा वैश्रवणेन महंदृष्टा समादिशत्॥ ॥कुलदीपकिमायात
सञ्जीवैवं यमालये॥ इत्यादिष्टं वचं श्रुत्वा तदा विज्ञापितं मया॥ तंद्रायां यमदूताभ्यां नीयते मे यमा
लये॥ वैश्रवणमहाराज जीवरक्षां कुरुष्व मम॥ इति निवेदितं श्रुत्वा निर्हतो हं सुहृज्जनाः॥ तदा सुहृज्जना

सर्वे कुलदीपं पर्यपृच्छत ॥ यमस्योत्तरद्वारे किं किमस्ति वद स्वभो ॥ इति विज्ञापितं श्रुत्वा कुलदीपं सः
मादिशत् ॥ ॥ कृतांतस्योत्तरे द्वारे अस्ति हिमालयो नगः ॥ तत्रासीबर्म्महाप्राज्ञो मुनिजना मह
र्द्धिकाः ॥ तत्र गत्वा मुनिजनान्मया संप्रार्थितं सदा ॥ मुनिजनाः युयं सर्वे किमर्थं कष्टमाश्रितम् ॥ ॥
इति विज्ञापितं श्रुत्वा मुनिजनां समादिशत् ॥ साधु श्रृणु कुलदीप भिक्षूणां ब्रह्मचारिणां ॥ शिक्षासम्वर
सांवृतं प्रवक्ष्यामि समासतः ॥ ये च शुद्धाशयाः सत्वा प्रव्रजित्वा जिनाश्रमे ॥ ॥ शिक्षासम्वरभि
क्षुणि धर्तुं निर्वृतिसाधनम् ॥ प्रथमं ते समालोक्य शुद्धक्षेत्रे मनोरमे ॥ निषद्य स्वासने ध्यात्वा संतिष्ठेर
समाहिताः ॥ ॥ भस्मास्थि केशजं वाला वल्कलामेध्य संकुले ॥ क्षेत्रे नैव निवास्तव्यं कदापि ब्रह्म

चारिभिः॥ दुःशीलैर्भिक्षुभिः सार्द्धं कर्त्तव्यो नैव संगतिः॥ आलोकोपि निवासोपि कर्त्तव्यो न कदाचन॥
दुःशीलैर्भिक्षुभिः सार्द्धं भोक्तव्यं नापि किंचन॥ ॥ न स्थातव्यं न गंतव्यं क्रीडितव्यं न चक्वचित्
॥ उपसंपन्ने दातव्या न चज्ञप्तिचतुर्थकं॥ सद्धर्मसाधनोपायं नापि देयं दुरात्मनां॥ दुःशीला हि दुरात्
मानो बौद्धशासनदूषकाः॥ ॥ मारचर्यानुसंरक्ताः क्लेशव्याकुलितेन्द्रियाः॥ तेषां नैवाभिदात
व्य आवासे सौगताश्रमे॥ दातव्यो दुरतस्तेषा मावास आश्रमाद्बहिः॥ संघालापो न दातव्यो दुःशीलानां
कदाचनः॥ ॥ न तेषां बोधिकीभूमी नैवार्हति कदापि हि॥ न तेषां विद्यते किंचि दर्हसंहृतिवा
रणं॥ सर्वसत्वोहिताधानं कुतः संबोधिसाधनम्॥ दुःशीलाभिसेवोहसा भवेयुः सौगताश्रमे॥ तत्रते

भिस्वस्सर्वैर्भ्रष्टाचाराद्दुराशयाः ॥ विहारे समुपासीनां चोरुर्गृहीचारकां ॥ भार्यापुत्रसुताभातृज्ञाः
ति वंधुसमन्विताः ॥ ॥ यथाकामं सुखं भुक्त्वा संचरेरन्स्त्रमोहिताः ॥ तेऽनीत्वाइन्यसंघानां स
र्वोपकरणान्यपि ॥ सर्वाणि स्वात्मसात्कृत्वा भविष्यंति जिनालयं ॥ यथेच्छयासमादाय भुक्त्वा भोग्यं
यथेप्सितं ॥ ॥ कुटुंवसाधनोपाये संचरेरन्स्त्रगल्भिकाः ॥ ते सांघिकोपचारेपि कुर्युर्विण्मूत्र
साधनम् ॥ श्लेष्मलालोवमोच्छिष्टं विसृजेयुश्च सर्वतः ॥ एतत्कर्म्मविपाकानि नतेमास्यंति दुर्धियः ॥
उन्मत्ता इव दुर्दांता चोरयुर्दुहितारतः ॥ ये सांघिकोपचारेषु कुर्युः श्लेष्मादिसर्जनम् ॥ ॥ शाला
ट्व्यां भवेयुस्ते प्रेताः शूचीमुखाः किलः ॥ विण्मूत्रादि परित्यागं कुर्युर्यः सांघिकाश्रमे ॥ वाराणस्यां भवेयु

स्येकृमयो गूथमूत्रजाः ॥ दंतकाष्ठादिकं हृत्वा प्रभुंक्षुर्ये च सांघिकं ॥ ते स्युः र कर्कटवृक मत्स्यादिजलजं
नवः ॥ ॥ व्रीहिद्रव्याणि हृत्वा भुंक्षुर्ये सांघिकानि च ॥ ते भवेयुर्महाप्रेताः श्वविमुखानगोदरा
ः ॥ येन पानादिकं हृत्वा भुंक्षुर्ये चापि सांघिकम् ॥ ते स्युर्हीनकुलेजाता हीनेन्द्रियश्च याचकाः ॥ ॥
ततश्च्युताश्च ते जाता लंगिन कुब्ज दुर्मुखाः ॥ कुष्ठव्याधिपनीतांगा भवेयुः पूतिवाहिकाः ॥ यदा ते उत्थिता
यायुर्यष्टिं धृत्वाशनैर्भुवि ॥ निपतेयुस्तदा तेषां सर्वाणि पिष्ठितान्यापि ॥ ॥ एवं ते बहुवर्षाणि
दुःखानि विविधानि च ॥ भुक्त्वा यावत्पापिकं कर्म हृत्वा यायुश्च नारकान् ॥ ये चापि सांघिकां भूमिं परिभोज्यं
तिलाभिनः ॥ ते दुष्टाक्लेशिनात्मानो यायुर्रौरवनारके ॥ ॥ तत्र तेषां मुखेन प्र लोहगुडानि वेशये

त्॥ तैस्तेषामभिधक्ष्यंते नालोष्टवुदराण्यपि॥ कराठहडुदरांज्ञादीन्धक्ष्यंते सर्वविग्रहान्॥ तथामृतापुनस्ते
पिजीवेयुः कर्मभोगिनः॥ ॥ यमपालैर्गृहीत्वाच क्षेप्स्यते घोर नारके॥ तेषांकर्म्मवशाजिव्हाभ
वेच्चमहज्जरी॥ कृष्यंते हलशतैस्तत्र जिव्हायां यमकिंकरैः॥ एवंवहूनिवर्षाणि दुःखानि विविधानिते॥
३७ ॥भुक्त्वामृताःपुनर्यायुर्नारकेगिनिघटे खलु॥ तत्र तेषांकर्मवशाज्जिव्हाप्रभवेदपितत्र च॥ शूचीश
तसहस्राणि विधेयुर्यमकिंकराः॥ तथापिते मृता नैव स्थास्यंति दुःखिताश्चिरं॥ ॥ ततस्तानग्नि
खदायांच क्षेप्स्यंति यमकिंकराः॥ तत्रापि ते मृता नैव स्थास्यंति कर्मभोगिनः॥ ततश्चोत्क्षिप्यतां स्तेन
शांक्षेप्स्यंति यमकिंकरैः॥ ॥ तत्रापि वहुवर्षाणि दुःखानि विविधानिते॥ भुक्त्वा स्थास्यंति दुःख

र्तास्तु चिरं कर्म्मभोगिनः ॥ एवं त्रिकल्पवर्षाणि भ्रमतां नरके सदा ॥ ततस्तत्कर्म्मवैपाकक्षीणं तेषां भवे
च्चिरात् ॥ ॥ ततश्च्युत्वा च ते जंबुद्वीपे जातास्तु दुःखिनः ॥ दरिद्रिताश्च जात्यंधा भवेयुर्दुरिताशया
॥ एवं च बहुदुःखानि प्रभुक्त्वा बहुजन्मसु ॥ सदा क्लेशान्विताः संतप्ता भ्रमेयुर्भवसागरे ॥ ॥ तस्मात्कुल
दीपसंघानां सर्व्वोपकरणान्यपि ॥ द्रव्याण्यपि च सर्वाणि रक्षितव्यानि यत्नतः ॥ अनित्या नैव भोक्तव्यं
सांघिकं वस्तु किंचन ॥ ॥ केनापि सांघिकं वस्तु जीर्णीकर्त्तुं न शक्यते ॥ तद्भोग्यमनीत्या हि सां
घिकं वस्तु किंचनः ॥ अस्पृश्यं वह्निवत्तप्तं दहनं वस्तु सांघिकम् ॥ ॥ भारोपमं सदाक्रांतमभेद्यं
वज्रसन्निभम् ॥ अपथ्यं विषवद्दुष्टं तीक्ष्णासिधारसन्निभम् ॥ वैषं तेजः शमीकर्त्तुं मंत्रौषध्यै हि शक्य

ते॥सांघिकं वस्तु हर्तुं न पापं केनापि शाम्यते॥ इति मत्वा त्वसंसारे संबोधि श्रीसुखेप्सुभिः॥ सांघिकं वः
स्तु यत्नेन रक्षितव्यं सदादरात्॥ ॥एवं विज्ञाय सं बोधि चित्तं धृत्वा समाहितः॥ त्रिविधां बोधि
मासाद्य सम्बुद्धपदमाप्नुयात्॥ इति मुनिजनादिष्टं श्रुत्वा हं प्रवसामि च॥ ॥तथा च मुनिः
जनास्सर्वे कथां ते धर्म्मदानकम्॥ धात्रीहरीतकीरंभा चूतं च फलमादिकं॥ स्कंधमूलादिकं दानं यः
थेप्सीतं फलं लभेत्॥ एतद्दानादितुं भावेन इप्सीतं फलमाप्नुयात्॥ ॥पुत्रार्थि लभते पुत्रं धना
र्थि लभते धनम्॥ क्षेत्रार्थि लभते क्षेत्रं गृहार्थि लभते गृहं॥ इति मत्वा कुलदीपत्वं दानधर्म्मसदाकुरु॥ ॥
इत्यादिष्टं वचं श्रुत्वा निर्वृहं सुहज्जनाः॥ ॥सुहज्जना यूयं सर्वे प्रत्यागतः कथां शृणु॥ यमस्य द

गो।

शेनं कृत्वा निर्हतो हं सुविस्तरं ॥ प्रथमं वैकृतानस्य स्थानान् वहि समागतः ॥ ततो वहि षट्कोण मष्ट
कोणं तथैव च ॥ ॥ [१] प्रथम द्वारे समासीना दिग्पाला चाति भीषणाः ॥ [२] द्वितीय द्वारे नाग गणाः स
माश्रिता भयंकराः ॥ [३] तृतीय द्वारे चतुर्महाराजा स्थिता महर्द्धिकाः ॥ [४] चतुर्योगिना चतुर्थे द्वारे स्थिता प्रमो
हिताः ॥ ॥ [५] पंचम द्वारे अष्ट लोकपाला समाश्रिताः ॥ ततो वहि वैतरणी नदी वहन्ती सर्वदा ॥ [६] षष्ठ
द्वारे खड्गपाणि समाश्रिता महर्द्धिकाः ॥ [७] सप्तम द्वारे हस्ति गणाः परिवृता समाश्रिताः ॥ ॥ [८] अष्टम
द्वारे सिंह गणाः समाश्रिता भयंकराः ॥ [९] नवम द्वारे कोष्टु गणाः समाश्रिताः प्ररोदिताः ॥ [१०] दशम द्वारे राक्षसा
ः समाश्रिता भयंकराः ॥ [११] एकादश द्वारे व्याघ्र गणाः गर्जिता च समाश्रिताः ॥ [१२] द्वादशे काक गणाः कूजिता च स

माश्रिताः॥ ततोवहि निकेतेन परिवृतानि शोभिताः॥ तत्रैव मनुष्यलोकाः समाश्रितानि शोभिताः॥ ततो
वहि परिवृता वानिका परिशोभिताः॥ ॥ततोवहि असिनाच परिवृतासमाश्रिताः॥ ततोवहि
कुलिशेन परिवृता भयंकरा॥ ततोवहि चैत्यविंवा परिवृतानि शोभिताः॥ ततोवहि शिवलिङ्गा परि
वृतानि शोभिताः॥ ॥ततोवहि अग्निज्वाला परिवृता महोज्वला॥ ततोवहि महानदी प्रवा॰
हिता भयंकराः॥ ततोवहि असिपत्र वनेन परिवर्त्तिताः॥ ॥एतत्सर्वं लंघयित्वा निर्वृतो हंसु
हज्जनाः॥ मातुर्गर्भान् यथा कष्टं भवति निर्गतंस्तथा॥ यमपुराद्वहि रागंतुं कष्टं भवति सर्वथा॥ कृतां
तस्य कथां श्रुत्वा सुहज्जनाः सुविस्मिताः॥ तदा सुहज्जनास्सर्वे प्राप्यानंदन्न प्रबोधिताः॥ ❖ ॥इति

श्रीविक्रमानंदविरचितायां धर्मराजकथायां नंद्राख्यांकुलदीपाय यमस्योत्तर द्वारात्प्रत्यागतप्र
शंसाषष्ठदशोध्यायः॥ ❖ ॥अथाब्रवीत्प्रसदनं ज्ञानदत्तोमहाविभुः॥एकदाकुलदीपाय ग्रस्तं
विसूचिकांगदाम्॥अधोवायुंमूर्द्ध्गतं ऊर्द्ध्ववायुंनिरोधितम्॥शीतलंहस्तपादेच सर्वांगंशीतलंतथा॥
दृष्टिहीनंस्वरहीनं सर्वांङ्गं ग्रहणंतथा॥नंद्रामोहप्रलापेन पीडितंकुलदीपकम्॥तदासुहृज्जनाःस
र्वे विस्मितासमुपार्थिताः॥ ॥अहोहीमहामायुरी रोगंभूतं समभवत्॥तस्मिन्काले यमद्वार य
मदूताःसमागता॥आगत्यसूत्रपाशेन पादांगुष्ठेप्रबंधितस॥कंठिकरोठे प्रबंधित्वा तस्याग्रेसंप्रतिष्ठि
ताः॥तस्मिन्कालेहितर्जन्या मंगुष्ठात्तद्वान्हिनिर्गतम्॥ ॥तथामध्यमांगुष्ठात् धूम्रं चापिविनि

र्गतम् ॥ तथैव वज्रांगुष्ठाद्यं चापि विनिर्गतम् ॥ पंचांगुष्ठान् हिमवत् नीरं चापि विनिर्गतम् ॥ तदा
कुलदीपाय दाहशीतं भवेत् किलः ॥ ॥ तदाकाशे दीर्घश्रेणी प्रदर्शितं तथा खलु ॥ दीर्घश्रे
णीकथं भूतं श्वेतनीलश्च लोहितम् ॥ पीतश्यामं विचित्रं च वस्त्रेणावेष्ठितं तथा ॥ शोपानाश्च तदा
महंतं ताडायां नीयते खलु ॥ ॥ व्याघ्रसिंहा कोलमुखा इत्येमे नीयते तथा ॥ तदाकाशे मयाद्द
ष्टं वैरोचनं महामुनिम् ॥ श्वेतरूपं शांतमूर्तिं वज्रासनं समाश्रितम् ॥ ॥ तथाक्षोभ्यं मयादृ
ष्टं नीलवर्णं महामुनिम् ॥ पीतवर्णं शांतरूपं रत्नसंभवशोगतम् ॥ अमिताभं रक्तवर्णं च वज्रासनं
समाश्रितम् ॥ ॥ अमोघसिद्धिं श्यामवर्णं पंचबुद्धं प्रदर्शितम् ॥ पंचभिर्मुनिभिः सर्वैर्द्देयु

मङ्गलाशिषम् ॥ सदा ते मंगलं भूयात् जीवाक्षांसदा भवेत् ॥ इत्याशिर्वचनं दत्वा दूतगणान्समब्रुवः
न् ॥ दूतगणाः कुलदीपाय मानीयं मे यसन्निधौ ॥ ॥ सामनापि न कर्त्तव्यं विसृजेत्वं निवेस
नम् ॥ इत्यादिष्टं वचंश्रुत्वा दूतगणाः प्रबोधिताः ॥ तदा दूतगणास्सर्वे निर्वृतंस्वं पुरं ययौः ॥ निर्वृते
दूतगणाः सर्वे शांतभूतं विसूचिकाम् ॥ ॥ विरामृत्त्ववमनंश्चैव शांतंभूतं तदा किलः ॥ तदा
कुलदीपाय तंद्रायां प्रतिबुध्यते ॥ तदा कुलदीपेन सुहृज्जनान्समब्रवीत् ॥ सुहृज्जना यूयं सर्वे शृणु
ध्वंतु समाहितः ॥ विसूचिकां महाव्याधिं महाघोरं भयानकम् ॥ ॥ पूर्वजन्मे मया पापं प्रकृतं
वहुधा किलः ॥ पापस्यानुभावेन रोगंभूतं पुनः पुनः ॥ तस्मात्सुहृज्जनाः पापं कदापि प्रकृतं न हि ॥

धर्म्ममेवसदालोके प्रकृतंवहुधाकिलः॥ धर्म्मेणावर्द्धते आयुर्धर्म्मेणासुखवान्भवेत्॥ धर्म्मेणहरते
पापं धर्म्मेणाधनवान्भवेत्॥ धर्म्मेणास्वर्गमाप्नोति मोक्षंवापिप्रलभ्यते॥ ॥तस्मात्सुहृज्ज
नालोके धर्म्मदानंप्रशस्यते॥ धर्म्मेणादेवलोकस्य दर्शनंच प्रलभ्यते॥ धर्म्मेणाचविसूचिकां रोगंह
रतिसर्वथा॥ विसूचिकांमहारोगे नप्रयोजनमौषधम्॥ ॥पूर्वजन्मस्यपापेन रोगंभवतिसू
चिकाम्॥ विसूच्यांहरणोपायं पाठंपूजांचकारयेत्॥ पाठपूजानुभावेन रोगंहरतिसर्वथा॥ इत्याः
दिष्टंवचंश्रुत्वा सुहृज्जनानुवोधिताः॥ ॥पुनःप्राहकुलदीपः सुहृज्जनान्विलोकयन्॥ मा
तृपितृसमायोगात् षट्गत्यांजायतेनराः॥ मातुर्गर्भान्सजायंते नवमासान्ययेसति॥ निमग्नंतिम

धर्म्मराज ९३ हा घोरे संसारसागरे नदीं ॥ पूर्वजन्मं कृतं पापं दुःखं भवति सर्वदा । पूर्वजन्मकृतं पुण्यं सुखं भवति स
र्वदा ॥ ॥ तस्माच्च मानवा लोकाः कुर्युर्हि धर्म्मदानकम् ॥ धर्म्महीना नरा लोका मृत्युंवशीभूंभवं
ति हि ॥ क्रियंते शासनं तत्र यमदूतैः सदा खलु ॥ स्वस्वकर्मानुसारेण पच्यंते घोरनारके ॥ ॥ य
मदूतैः समागृह्य यमपाशेन वध्यते ॥ पाशैर्वद्धा अंधकारे नारके नीयते तदा ॥ अंधकारात्समुद्धृत्य रौर
वे नीयते तथा ॥ रौरवाच्च समुद्धृत्य अवीच्यां पच्यते खलु ॥ ॥ अवीच्याँच्च समुद्धृत्य क्षुरधारेः राम
प्र नीयते ॥ क्षुरधारां समागृह्य नीयते प्रेतनारके ॥ प्रेतनद्यां यमदूतैः प्रक्षिप्यते तथा खलु ॥ प्रेतनद्या ९३
त्समुत्सृज्य हीनकुले प्रजायते ॥ ॥ हीनकुले समाश्रित्य महारोगं समुद्भवम् ॥ महारोगानुभा

वेनहस्तपादौप्रणस्यते॥एवंसर्वंमहादुःखंभुक्त्वाहिमरणंभवेत्॥तस्मात्त्वसुहृज्जनालोका·धर्म्मदानंकु
रुसदा॥ ॥धर्म्मदानानुभावेन·सर्वरोगात्प्रमुच्यते॥धर्म्मदानानुभावेन·स्वर्गलोकेप्रयांतिहि॥इ
तिसमादितंश्रुत्वा·सुहृज्जनाःप्रबोधिताः॥ ॥इतिश्रीविक्रमानंदविरचितायांधर्म्मराजकथा
यां·कुलदीपायविस्तविरोगाभूतस्यप्रशंसासप्तदशोध्यायः॥ १७ ॥अथशास्त्राज्ञानदत्तो·ब्रह्मदत्तंस
मादिशत्॥तत्पूजाकृतपुण्यानां·विशेषंफलमुच्यते॥नकुरुष्वब्रह्मदत्त·समाधायसुचेतसा॥येपुण्य
कामामनुजास्त्रिरत्नं·समीक्ष्यहर्षोत्कुरणंप्रयांति॥तेधर्म्मरक्ताःशुभलक्ष्मीवंतःसम्बोधिचर्याभिरताभवं
ति॥ ॥पंचामृतैःपंचसुगंधितोयैःस्नात्वासुखंतेदिविसंरमंते॥येचत्रिरत्नेषुसुगंधिधूपं·प्रधूपः

धर्म्मराज. ९४

यंति प्राति मोदयंति ॥ तेषु प्रचिता शुचि गंधितांगा रत्नोपमाः श्रीगुणिता भवंति ॥ ॥ ये पंचगंधै रनु
लेपयंति त्रिरत्न देहे परिशुद्ध चित्ताः ॥ ते रत्नवंतः क्षिति पाधिराजा भवंति सर्वार्थ हितार्थ कामाः ॥ ९६
ये दुग्ध पट्टादि वराम्बराणि त्रिरत्न नाथाय मुदार्पयन्ति ॥ कौशेय रत्नाभरणाढ्यतांगा धर्माधिपास्ते सुधि
यो भवंति ॥ ॥ ये च त्रिरत्नं स्थलजैः सुपुष्पै जलोद्भवैश्चापि समर्चयंति ॥ ते दिव्य लक्ष्मीषु भगा
भवंतः श्रीसिद्धिमंतः सुराया भवंति ॥ ॥ त्रिरत्न विंबे वर पुष्पमाला ये धर्म्मकामा अवलंबयंति
॥ ते देवराजा वर लक्ष्मीवंतः सर्वोधिकामाः सुभगा भवंति ॥ ॥ सर्वाणि पुष्पाणि सुगंधिमंति त्रि
रत्न विंबे प्रकिरंति ये च देवाधिपाः स्वर्गगता भवंति महीगतास्ते क्षिति पाधिराजाः ॥ ॥ ये दीपमाः

गुरुः ९४

मालारचयंति ये च रत्नत्रयाग्रे हतमोहजाला ॥ ते कांतरूपागुणारत्नवंतो भवंति भूयार्चितपादपद्माः ॥ प्र
कुर्वते ये च प्रदीपदानं रत्नत्रयाग्रे घृततैलदीपम् ॥ ते शुद्धनेत्रा प्रवलागुणाढ्या देवाधिराजाः क्षितिपा
धिपाश्च ॥ ॥ भोज्यं प्रणीतं सुरसं सुवर्णं रत्नत्रयाय प्रतिपादयंति ॥ ये भक्तियुक्ता दिवि ते भवंति सु
राधिपो भूपनयश्च वीराः ॥ पानं नरा ये मृतसद्गुणाढ्यं रत्नत्रयाय प्रतिपादयंति ॥ ये थेष्टभोग्यं सततं प्र
भुक्त्वा गच्छंति तनते सुगतालये च ॥ ॥ ये चात्रिरत्नाय समर्पयंति सुपथ्यभैषज्यगणानि भक्त्याः
॥ श्रीमत्समृद्धाः क्षितिपाधिनाथा भुक्त्वा सुखं यांति जिनालयं ते ॥ ताम्बूलपूगादि रसायनानि ये चात्रिरत्ना
य समर्पयंति ॥ दिव्यांगसौंदर्यगुणाभिरामा भवंति ते श्रीगुणिनः सुराश्च ॥ ॥ विनानसुचैवितनो

नियेच रत्नत्रयेसर्वनृपाभिवंद्यः ॥ विशालवंशोगुणवान्सुधीरो महानुभाव प्रथितो भवेत्सः ॥ ध्वजान्विचित्रा
नवरोपयंति येचत्रिरत्नालयउत्सवार्थं ॥ तेश्रीसमृद्धाः सुगुणाभिरामा भवंति नाथादिविभूतलेच ॥
३७ ॥ श्रीमत्पताका अवलम्बयंति रत्नत्रयेयेसुरसाभियुक्ताः ॥ लक्ष्मीश्वरास्तेजिनदुष्टसंघा भवंत्यधी
शादिभिभूतलेच ॥ छत्राणिसौवर्णमयानियेच कौशेयदुष्यैरचितानिवाच ॥ सुसुक्तांगौर्मयनैश्चपु
ष्पै रत्नत्रयेयेप्यवरोपयंति ॥ ॥ तेभूपराजावलिमिद्धिमंतो लक्ष्मीश्वराः सर्वहितार्थकामाः ॥
सद्धर्मकामागुणरत्नपूर्णा वंद्याभवंति प्रवरर्द्धिमंतः ॥ संगीतवाद्यैर्मुरजादिभिश्च मुकुन्दठक्काप्र
णवानकैश्च ॥ मृदुमृदंगापटहादिभिश्च मनोज्ञघोषैः कृतिविजरम्ये ॥ ॥ मदुन्दुभिडिंडिमझर्झ

रैश्च प्रणादिभिर्मलवादनैश्च ॥ तथान्यकैर्मङ्गलशङ्खवाद्यै रत्नत्रयेये रचयंति पूजाम् ॥ तद्दुर्गतिंते सततंत्र
जंति स्वर्गं प्रयान्ताः सुभगा रमंते ॥ ॥ पुनः प्राह ज्ञानदत्तो वस्त्ररत्नं स्वाशिष्यकम् ॥ शृणुष्वाहि वस्त्रदः
न्त दानफलं विशेषणाम् ॥ ॥ भूमौ दुकूलसुकुमारविचित्रपटैः संतारयेत्सुगतसंघपरिक्रमाय ॥ ये
नार्पितेविपुलभोगमहानिधानं तेनावनीपतिरभूत्स भवेत्सुतस्य ॥ भूपटस्य ॥ ॥ नकिंश्चिदुस्मोद
कपादमेवच सुशीतलं स्वच्छसुगंधिकं तथा ॥ प्रक्षाल्य पादौ सुगतस्य श्रद्धया ततः कुवेरत्वमुपेत्य सोऽ
नरः ॥ पादार्घः ॥ ॥ सुपीतवासार्पितभूमिमण्डले परिक्रमार्थं प्रकरोति लीलया ॥ तथागतस्यार्य
गणोत्तमस्य वाचौपमां सद्यमहीभुजेश्वरः ॥ पीतवासस्य ॥ ॥ विकीर्यते येन सपुष्पराजिकां मौनी

द्रसंघार्यगणोत्तमाग्रतः॥भवंत्यसौकांतिवपुर्धनाधिपःप्रवृद्धवृद्धत्वपदंययौसुधिः॥पुष्पराजिकस्य॥
श्रीखंडकुंकुमसुशोभितचंदनादीन्॥कुर्वन्तितेसतिलकान्सहवृद्धसंघैः॥तेप्राप्नुवंतिजगतांतिलकः
कोपमत्वम्‌सौन्दर्यरूपंपृथुद्रव्यविशालवंशाः॥तिलकस्य॥ ॥काश्मीरशीलमृगनाभिसुगंधि
द्रव्यं येसौगतस्यवपुषिप्रतिलेपयंति॥संवुधवंशविपुलंचसुगंधदेहं तेषांभवंतिपरमभोग्यमहानि
धानम्॥सुगंधलेपनस्य॥ ॥स्वर्णस्यतिलकंसंघैःश्रद्धयायेवदास्यतिशुद्धतेजाभिवर्णास्य
त्रिभवेषुसजायते॥स्वर्णतिलकस्य॥ ॥प्रवालमुक्ताद्यपिरत्नमालासंघेभ्यःश्रद्धान्वितोयो
प्रदद्यात्॥द्रव्याधिद्रव्यविभवभवत्यधीनःसंभाविकोशपुरुषोभवंति॥मुक्तादिमालायाः॥ ॥स

र्वतथागतालंकृतसंभव मौलीददंतियोसौप्रसन्नचित्तेनसहिरत्नखचितंमकुटंचयत्नात् ॥ संपूज्यदेवा
धिकसंघसहेनसमहादरेण संबुद्धबोधिमहासुखमाश्रयेषु दिव्यंनयंति ॥ रत्नमकुटस्य ॥ ॥ यज्ञो
पवीतंसुकुमारवास संपादयंति हगणोत्तमस्य ॥ भूयीष्टकोषंसमवाप्यभूय स्तेप्राप्नुवंतीन्द्रपदंविशालं
वस्त्रं ॥ ॥ दिव्यंकाषायवस्त्रंमहिगौरिकधाभिलिप्तं प्रावरणंचसहचीवरसंघवरोखुयेन ॥ दद्यात्स
जातोयतिषु प्रतिभिः प्रतिभिःसजन्मे नशीयते शीतवसनेननहिवेष्टितेन ॥ चीवरकाषायवस्त्रस्य ॥ ९६
३० ॥ गोवारिजंविविधपुष्पसुगंधियुक्तं अम्लान्वितंसुमनसांप्रतिपादयंती ॥ येसौगतार्यसहसासनसांघिके
भ्य स्तेप्राप्नुवंतिसुराराजमहेन्द्रलक्ष्मी ॥ पुष्पमालायाः ॥ ॥ छत्रीभूतोभवंतिजगतामातपत्रप्रदानात्

धर्म्मराज
९७

छयारम्येवसंतिसुरुचिरं लीलयाराजलक्ष्मी॥धर्म्मस्वामीभवनिनियतंसर्वलोकस्यनाथः॥छत्रदानस्य॥
॥ ॥सायोजिकंसहजसौरभधूपवासं भक्त्याददातिसुगनायससांघिकाय॥तेप्राप्नुवंतिविपुलंधन:
धान्यभोगान् संवुद्धमव्ययपदं खलुयेलभंते॥धूपस्य॥ ॥तैलंतिलाज्यमथवादिनदीपं येसांघिकायप्र:
तिपादयंति॥संदर्शनीयोनयनाभिरामाभवंतितेदिव्यसुखोपभोगी॥दीपस्य॥ ॥धात्रीहरितकी:
लंभा चूतंचपनसादिकं स्कंधमूलादिकंदानात् यथेप्सितं फलंलभेत॥फलमूलादिकस्य॥ ॥सुशी
नलंस्वच्छसुगंधितोयं स्वादान्वितं येनसुवारिपात्रं॥ददंतिसंघायगणोनमाये तृषानचित्यार्थयदंल
भंते॥ऊणिंडकायात्रस्य॥ ॥लाणइक्यपूपकरपौलिकंचसम्यग्ददातिमनसादिविधानयुक्तम्॥९

गुरु
९७

भोगैश्वरो भवति यो भुवि शांतमानं सत्कायवाक्यमनसा जिनसांघिकाय ॥ लाडुकादि पूयस्य ॥ ॥ पं
चामृतैः पंचसुगंधसार्तैर्दुर्वाक्षतैः कुण्डमलाजतोयैः ॥ येनार्घदानं प्रकरोति संघे ते प्राप्नुवंति सुखमाधि
धानं ॥ अर्घावमनस्य ॥ ॥ सौवर्णरौप्यं विविधधातुजमृन्मयं वा शाल्योदनं सुपरिपूर्णसुपिण्ड
पात्रं ॥ भक्त्या ददाति सुगनाय गणोत्तमाय स्यात्तस्य पुण्यमसमं फलमप्रमेयम् ॥ पिण्डपात्रस्य ॥
माहिष्यगोरसवरं कनिकान्वितं ये वैकृत्य तंदुल महोदक मोदनं ते ॥ तस्मै ददंति सततं जिनसांघिकाः
य ते प्राप्नुवंत्यतुलभाग्य सराजलक्ष्मी ॥ क्षीरोदनस्य ॥ ॥ बलवान्स्थानसंपन्नो राजा भवंति म
हर्द्धिकाः ॥ संघेभ्यो भोजनं दत्वा सर्वत्र सुखमेधते ॥ भोजनस्य ॥ ॥ अश्वत्थमप्याद्यपमार्गका

धर्म्मराज
९८

ष्ठैर्योसोददंतिसुगतेसहिदन्तकाष्ठम् ॥ हिमस्यवर्णान्वितसुभ्रदंतःशुचौविशुद्धविमलंप्रभंवकाशम् ॥
दंतकाष्ठस्य ॥ ॥ व्रीहिश्चधान्यंभुविसर्वजातंश्रद्धान्वितंयःप्रददातिसंघे ॥ इष्टंफलंतस्यभवेमुनि
त्यंसर्वार्थकामंसमुपैतिसम्यक् ॥ व्रीह्यादिकस्य ॥ ॥ विभवान्सर्वसंपूर्णसर्वऋस्यसमन्वितः ॥
जिनसंघाययोदद्यात्तन्दुलस्यफलंभवेत् ॥ तंडुलस्य ॥ ॥ शुद्धंस्फटिकसंकाशंरजसर्वसमन्वि
तम् ॥ लवणंयोददातीहजायतेयोगविन्महान् ॥ लवणस्य ॥ ॥ प्रसन्नवर्णामृदुपाणिपादामहा
बलाःशुक्लभिरप्रहृष्याः ॥ तैलप्रदानेनभवंतिमर्त्याःसुरूपरूपासुखमाप्नुवंति ॥ तैलस्य ॥ ॥ कर्पू
रमोदाभिसुगंधिनोयैःप्रक्षालनायमुखपानविशुद्धिनाय ॥ ददंतियोसौसुगतस्यश्रद्धयासंशुद्धवंशावि

गुरु
९८

फलंचमहानिधानम्॥आचमनस्य॥ ॥नव्याधिरोगंनचवह्निभावमारोग्यतानित्यमनंतभोग्यं॥भवेसु
धीरोसुविशालवंशोभैषज्यदानात्लभतेमनोज्ञम्॥भैषज्यस्य॥ ॥राजायक्ष्मकवर्णीधनुरसिकालिङ्गे
र्वाङ्गिकंनादिवर्षैर्नोभिन्नोदिव्यदेहोभवतिरिपुगणौघ्नायधृष्योधनाढ्यः॥प्रायश्चत्यस्तुजाक्षोयइ
हमुनिवरेकांशभाण्डादिदानं॥संघेसंसारसारेप्रवरसुरनतंयातिवुद्धत्वमेषः॥ताम्रादिकंशभांज
नस्य॥ ॥यथानुलभ्यतेद्रव्यंदक्षणायःप्रयच्छति धर्मार्थकाममोक्षंचप्राप्नुवन्तिभक्तिमानसः
एवमेतद्विधानेनदेशयित्वानराधिपः॥यथानथागतायार्हतेदीपंकरमुनीश्वरं॥दक्षणा॥ ॥यत्या
नंवर्णगंधंप्रकृतिगुणयुतंकल्पितंभृद्धिनाशि॥श्लेष्माघातोश्वावातःप्रशमनचतुरंपिप्पलीखण्डचूर्ण

म् ॥ ग्रीष्मेकालेयमिश्रंशशिकारसदृशंभाजनेसंस्थितन्नत् ॥ दत्वासंघेप्रभक्त्या अमरभुवनगतोदिव्यमाप्नोः
तिपानम् ॥ पानकस्य ॥ ॥अथखलुराजासंवंदयित्वा भगवंतमेतदवोचत् ॥ अद्यमेसफलंजन्मसफलं
जीवितंचमे ॥ अद्यतुद्रकलेजातोतुद्रपन्नोस्मिसांप्रतम् ॥ ॥पराभवंतुमदात्सुरवि आयुरारोग्यसंपदम् ॥
॥ ॥इतिश्रीविक्रमानंदविरचितायांधर्म्मराजकथायांपूजादानप्रशंसा अष्टादशोध्यायः ॥ समाप्तं
शुभम् ॥ ॥भूयात् ॥ ❖ ॥अथाब्रवीत्ज्ञानदत्तो ब्रह्मदत्तंस्वशिष्यकम् ॥ एकदाकलदीपस्य वज्रसत्वस्यमू
र्त्तिकम् ॥ स्थापितंस्वयंभुस्थाने चौरैराणापहृतंकिलः ॥ देशदेशांतरंगत्वा चौरैराविक्रियंस्ततः ॥ दोर्जलिङ्गमिति
ख्यातंदेशेनिवासिनोजनाः ॥ ॥यथामुल्यंप्रदियत्वा समागृह्यप्रणीयतः ॥ तदाकलदीपेनमूल्यंदत्वा॰

ग्रणीयतः ॥ सुहृन्मित्रादिवन्धुभिः प्रास्थितास्सम्प्रहर्षिताः ॥ ॥ तदाकुलदीपेन सुहृज्जनान्निमंत्रितः ॥ शि-
विकायां प्रतिष्ठाप्य वज्रसत्वस्वमूर्त्तिकम् ॥ नानावाद्यं प्रवादित्वा देशयात्रां प्रकारयेत् ॥ देशयात्रां सम्प्रकुर्वित्वा स्वगृ-
हेनीयतस्सदा ॥ ॥ स्वगृहे सं प्रवेशित्वा नित्यपूजां प्रकारयेत् ॥ वज्रसत्वानुभावेन दानं कर्त्तुं समिच्छितः ॥
निर्मित्वा स्वगृहे निकटे दानशालां सुशोभिताम् ॥ तण्डुलानि वद्रव्याणि धान्यादिविविधानि च ॥ फलमूलादिपानानि
सर्वोपकरणानि च ॥ एतैः सर्वैः पूरयित्वा दानं कर्त्तुं समिच्छितः ॥ ॥ तदा मुनीश्वरो धीमान् दीपंकरादिसौग-
ताः ॥ आगत्य दानशालायां प्रवेशिता यथाक्रमात् ॥ सर्वदानं गृहीत्वा वै आशिर्वादं ददन्तु ते ॥ दानधर्म्मानुभावेन चां-
नेया यातु सुखावतीम् ॥ ॥ इत्याशिर्षवचं श्रुत्वा कुलदीपसहर्षितः ॥ तदाकुलदीपेन दीघंकरादिसौगतान्

पादाब्जे वंदनां कृत्वा क्षमार्पणं तदा कृतम् ॥ भगवन् मुनिशार्दुल ममोपरिक्षमां कुरुः ॥ ॥ इति विज्ञापि
तं कृत्वा दीपंकरा मुनीश्वरः ॥ प्रविलोक्य जनान् सर्वान् आशिर्वादं ददत्तु वै ॥ दानपुण्यानुभावेन यायासुः सुगता॰
लये ॥ ॥ इत्याशिर्वचनं दत्वा प्रत्यगमत् मुनीश्वरः ॥ कुलदीपोपितं दानं विसर्जनं कृतं ततः ॥ एतत्पु॰
ण्यानुभावेन कुलदीप दिवं ययौ ॥ ॥ इति श्रीविक्रमानंद विरचितायां धर्मराजकथायां दानधर्म्मानुसंशा
उनविंशोध्यायः ॥ समाप्तम् ॥ ॥ शुभम् ॥ ❁ ॥ भूयात् ॥ स्वस्ति श्रीविक्रमादित्य सम्वत् १९७१ नेपाल सम्वत् १०३४
आषाढ कृष्ण षष्ठमि सोमवार थ्व दिनस धर्म्मराजकथा सिद्धयेका दिन जुल शुभम् ॥ ❁ ॥ भूयात् ॥ ❁ ॥ छ ॥
लिखितं ज्ञ वाहाल तोल ब्रह्मचक्र महाविहारस जन्मजुरम्ह श्री वज्राचार्य मानवीसिंहनं थ्व ग्रन्थ जुत्मक च्वोया जुल शुभम् ॥ छ